# चतुर्वर्षीयः एकीकृतशिक्षकशिक्षाकार्यक्रमः

# FOUR-YEAR INTEGRATED TEACHER EDUCATION PROGRAMME (ITEP)

## बी.ए.बी.एड्.- माध्यमिक

**(B.A-B.Ed.- Secondary)**

**2024 onwards**

**(As per NCTE Regulations 2022)**

## शिक्षाशास्त्रकौशलप्रशिक्षणविद्यास्थानम्

## केन्द्रीयसंस्कृतविश्वविद्यालयः

**(संसदः अधिनिमेन स्थापितः)**

**रा.मू.प्र. परिषदा A++ श्रेण्यां प्रत्यायितः**

## एकीकृतशिक्षकशिक्षाकार्यक्रमस्य रूपरेखा

एकीकृतशिक्षकशिक्षाकार्यक्रमस्य व्यापकसंरचना : आईटीईपी कार्यक्रमस्य अध्ययनावधिः वर्षचतुष्टयम् (अष्टानां सत्रार्द्धानाम्) अस्ति। अयं द्विविधस्नातकोपाधेः कार्यक्रमः वर्तते। अत्र एकः स्नातकोपाधिः शिक्षाशास्त्रे अपरश्च स्नातकोपाधिः ज्ञानस्य बहुविषयकशाखायाम् अन्तर्विषयकशाखायां वा प्रदीयते। किञ्च कार्यक्रमोऽयं छात्रशिक्षकयोः सामाजिकप्रतिबद्धतां समस्यासमाधानयोग्यताम् आलोचनात्मकचिन्तनं नैतिकतां रचनात्मकविचारान् सञ्चारकौशलानि चेत्यादीन् सामर्थ्यविशेषान् विकासयितुं क्षमते । योग्यान् शिक्षकान् निर्मातुम् इमानि सामर्थ्यानि अपेक्ष्यन्ते।

### 1.2. पाठ्यक्रमघटकाः

ITEP इत्यत्र निम्नलिखितपाठ्यचर्याघटकाः सन्ति -

1. द्विसाप्ताहिकः दीक्षारम्भकार्यक्रमः
2. शिक्षायाः आधाराः (30 श्रेयोऽङ्काः)
3. शास्त्रीयविषयाः/अन्तःशास्त्रीयविषयकपाठ्यक्रमः (72 श्रेयोऽङ्काः)
4. माध्यमिकस्तरविषयाधारितशिक्षणशास्त्रम् (16 श्रेयोऽङ्काः)
5. योग्यतासंवर्धानात्मकः मूल्यवर्धितश्च पाठ्यक्रमः (28 श्रेयोऽङ्काः)
6. विद्यालयानुभवः (20 श्रेयोऽङ्काः)
7. व्यावसायिकक्षमतोन्नयनं सामुदायिकसेवा च (10 श्रेयोऽङ्काः)

**द्विसाप्ताहिकः दीक्षारम्भकार्यक्रमः ।**

**शिक्षायाः आधाराः (30 श्रेयोऽङ्काः)**

**शास्त्रीयविषयाः/अन्तःशास्त्रीयविषयाः (72 श्रेयोऽङ्काः)**

**माध्यमिकस्तरविषयाधारितशिक्षण शास्त्रम् (16 श्रेयोऽङ्काः)**

**योग्यतासंवर्धानात्मकः मूल्यवर्धितश्च पाठ्यक्रमः (28 श्रेयोऽङ्काः)**

**विद्यालयानुभवः (20 श्रेयोऽङ्काः)**

**व्यावसायिकक्षमतोन्नयनं सामुदायिकसेवा च (10 श्रेयोऽङ्काः)**

## पाठ्यचर्यात्मकघटका:

| क्र.स. | पाठ्यचर्यात्मकघटका: | पाठ्यविषया: | प्रतिसत्रार्धं श्रेयोऽङ्का: | | | | | | | | पाठ्यविषयश: श्रेयोऽङ्का: | आहत्य श्रेयोऽङ्का: |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | स.-1 | स.-2 | स.-3 | स.-4 | स.-5 | स.-6 | स.-7 | स.-8 | | |
| 1 | द्विसाप्ताहिक: दीक्षारम्भ: कार्यक्रम: | | - | - | - | - | - | - | - | - | - | - |
| 2.1 | | भारतीयशिक्षाया: विकास: | 4 | - | - | - | - | - | - | - | 4 | |
| 2.2 | | बालविकास: शैक्षिकमनोविज्ञानञ्च | - | - | 4 | - | - | - | - | - | 4 | |
| 2.3 | | शिक्षाया: दार्शनिकं सामाजिकञ्च परिप्रेक्ष्यम् – I | - | - | - | 4 | - | - | - | - | 4 | |
| .2.4 | | आकलनं मूल्याङ्कनञ्च | - | - | - | - | - | 2 | - | - | 2 | |
| 2.5 | | समावेशात्मिका शिक्षा | - | - | - | - | - | 2 | - | - | 2 | |
| 2.6 | | विद्यालयनेतृत्वं तथा प्रबन्धनपरिप्रेक्ष्यम् | - | - | - | - | - | - | 2 | - | 2 | |
| 2.7 | | पाठ्यचर्यायोजना तद्विकासश्च (पाठ्यपुस्तकम्, सामग्रीविकास: अन्यच्च) | - | - | - | - | - | - | 2 | - | 2 | |
| 2.8 | | शिक्षाया: दार्शनिकं सामाजिकञ्च परिप्रेक्ष्यम् – II | - | - | - | - | - | - | - | 4 | 4 | |
| 2.9 | | शिक्षानीतिविश्लेषणम् | - | - | - | - | - | - | - | 2 | 2 | |
| 2.10 | शिक्षाया: आधारा: | अधोलिखितेषु कश्चन एक: विकल्प: –<br>(i) किशोरावस्था शिक्षाच<br>(ii) मानसिकस्वास्थ्याय शिक्षा<br>(iii) सन्धारणीयविकासाय शिक्षा<br>(iv) शिक्षायाम् उदीयमाना प्रौद्योगिकी<br>(v) लैङ्गिकशिक्षा<br>(vi) निर्देशनं परामर्शनञ्च<br>(vii) मानवाधिकारशिक्षा<br>(viii) शान्तिशिक्षा<br>(ix) क्रीडा सौष्ठवञ्च | - | - | - | - | - | - | - | 4 | 4 | 30 |
| 3.1 | शास्त्रीयविषया:/ | (i) साहित्यम्/व्याकरणम्/दर्शनम्/ज्योतिषम् (पत्रद्वयम्) | 8 | 8 | 8 | 8 | 8 | 8 | - | - | 48 | |
| 3.2 | अन्त:शास्त्रीयविषया: (विद्यालयपाठ्यचर्यात:) | (ii) हिन्दी/आंग्लम्/मलयालम्/इतिहास:/ राजनीति/रङ्गमञ्च (एकं पत्रम्) | 4 | 4 | 4 | 4 | 4 | 4 | - | - | 24 | 72 |

| क्र.स. | पाठ्यचर्यात्मकघटका: | पाठ्यविषया: | | प्रतिसत्रार्धं श्रेयोऽङ्का: | | | | | | | | पाठ्यविषयश: श्रेयोऽङ्का: | आहत्य श्रेयोऽङ्का: |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| 4.1 | माध्यमिकस्तरीयं विषयाधारितं शिक्षणशास्त्रम् | (i) माध्यमिकस्तरीयशिक्षणशास्त्रम् | | - | - | 4 | - | - | - | - | - | 4 | 16 |
| 4.2 | | (ii) संस्कृतशिक्षणशास्त्रम् | | - | - | - | 2 | - | 2 | - | - | 4 | |
| 4.3 | | (iii) शास्त्रशिक्षणशास्त्रम् (साहित्यम्/व्याकरणम्/ज्योतिष/दर्शनम्) | | - | - | - | - | 4 | - | - | - | 4 | |
| 4.4 | | (iv) आधुनिकविषयशिक्षणशास्त्रम् (हिन्दी/आंग्लम्/सामाजिकम्/मलयालम्) | | - | - | - | 2 | - | 2 | - | - | 4 | |
| 5.1 | योग्यतासंवर्धनं मूल्यसंवर्धित-पाठ्यविषयाश्च | सम्प्रेषणात्मकं संस्कृतम् | | 4 | - | - | - | - | - | - | - | 4 | 28 |
| 5.2 | | सम्प्रेषणात्मकम् आंग्लम् | | - | 4 | - | - | - | - | - | - | 4 | |
| 5.3 | | कलाशिक्षा (प्रदर्शनकला: दृश्यकलाश्च) | | 2 | - | - | - | - | - | 2 | - | 4 | |
| 5.4 | | भारतावबोध: (मान्यता: ज्ञानप्रणाली च) | | 2 | 2 | - | - | - | - | - | - | 4 | |
| 5.5 | | शिक्षक: समाजश्च | | - | 2 | - | - | - | - | - | - | 2 | |
| 5.6 | | शिक्षायां सूचनासम्प्रेषणप्रौद्योगिकी | | - | - | - | - | 2 | - | - | - | 2 | |
| 5.7 | | गणितीय: संख्यात्मकश्च तर्क: | | - | - | - | - | - | 2 | - | - | 2 | |
| 5.8 | | क्रीडा पोषणं सौष्ठवञ्च | | - | - | - | - | - | - | 2 | - | 2 | |
| 5.9 | | योग: आत्मबोधश्च | | - | - | - | - | - | - | - | 2 | 2 | |
| 5.10 | | नागरिकता सन्धारणीयता पर्यावरणशिक्षा च | | - | - | - | - | - | - | - | 2 | 2 | |
| 6.1 | विद्यालयानुभव: | पूर्वप्रशिक्षुता (सब्रह्मचारिशिक्षणं प्रदर्शनपाठाश्च) | | - | - | - | - | 2 | - | - | - | 2 | 20 |
| 6.2 | | विद्यालयावलोकनम् (क्षेत्राभ्यास:) | | - | - | - | - | - | 2 | - | - | 2 | |
| 6.3 | | विद्यालयाधारिता शोधपरियोजना | | - | - | - | - | - | - | 2 | - | 2 | |
| 6.4 | | शिक्षणप्रशिक्षुता | | - | - | - | - | - | - | 10 | - | 10 | |
| 6.5 | | उत्तरप्रशिक्षुता (समीक्षा विश्लेषणञ्च) | | - | - | - | - | - | - | - | 2 | 2 | |
| 6.6 | | शिक्षणाधिगमसामग्रीनिर्माणम्/कार्यानुभव: (शैक्षिकक्रीडनकनिर्माणम्/ स्थानीयम्/ पारम्परिकव्यवसायिकम् इत्यादीनि) | | - | - | - | - | - | - | - | 2 | 2 | |
| 7.1 | व्यावसायिक-क्षमतोन्नयनं सामुदायिकसेवा च | सामुदायिकसेवा (राष्ट्रियसेवायोजना, साक्षरता कार्यक्रम: इत्यादय:) | | - | - | - | - | - | - | - | 2 | 2 | 10 |
| 7.2 | | भारतीयज्ञानपरम्परामाधृत्य वैज्ञानिकपरियोजना | (i) स्वशास्त्रीयपरियोजना | - | 2 | - | - | - | - | - | - | 2 | |
| | | | (ii) शिक्षाशास्त्रीयपरियोजना | - | - | - | - | - | - | - | 2 | 2 | |
| 7.3 | | वाग्वर्धिनी | (i) संस्कृतम् | - | - | 1 | - | - | - | - | - | 1 | |
| | | | (ii) आंग्लम् | - | - | - | 1 | | | | | 1 | |
| 7.4 | | शास्त्रार्थ: | | - | - | - | - | 2 | - | - | - | 2 | |
| **आहत्य श्रेयोऽङ्का:** | | | | **24** | **22** | **21** | **21** | **22** | **24** | **20** | **22** | **176** | **176** |

**2. कार्यक्रमस्य उद्देश्यानि :**

**बी.ए.बी.एड्. इति पाठ्यक्रमः निम्नलिखितोद्देश्यानुगुणं परिकल्पितः अस्ति -**

1. वर्तमानकक्ष्यायाः समाह्वानानां वारणाय व्यावसायिकरूपेण व्यवहर्तुञ्च ज्ञानदक्षताभिः सज्जितानां शिक्षकाणां निर्माणम्।
2. क्षेत्रानुभवाधारेण व्यावहारिकानुभवेन च सह शिक्षायाः परिप्रेक्ष्ये सुदृढपृष्ठभूमिवतां शिक्षकाणां निर्माणम्।
3. शिक्षाशास्त्रीयज्ञानस्य तर्कसङ्गतसङ्कल्पनायाः विकासः एतस्य ज्ञानस्य विशिष्टविषयेषु योजनञ्च।
4. शिक्षकेषु व्यावसायिकनैतिकतायाः विषये गहनाम् आलोचनात्मिकाञ्च जागरूकतां समुत्पाद्य चिन्तनात्मकाभ्यासेषु सहभागितायाः क्षमतायाश्च विकाससाधनम्।
5. विशिष्टबालकानां शैक्षिकावश्यकताः अवगन्तुं शिक्षकाणां सज्जीकरणम्।
6. सामाजिकसंसाधनानाम् अभिज्ञानाय तेषाम् उपयोगाय च शिक्षकाणां निर्माणम्।

**माध्यमिकस्तरस्य शिक्षकाणां निर्माणाय विशिष्टोद्देश्यानि -**

1. माध्यमिकशिक्षायाः स्वरूपम्, उद्देश्यं दर्शनञ्च अवगन्तुं भाविशिक्षकाणां सामर्थ्यसम्पादनम्।
2. शिक्षकाः विद्यार्थिनां मनोविज्ञानम् अवगन्तुं क्षमाः स्युः।
3. ते सामाजीकरणप्रक्रियाम् अवगच्छेयुः।
4. ते विशिष्टस्तरस्य पाठ्यक्रमविकासाय तस्य सञ्चालनाय मूल्याङ्कनाय च सम्बद्धां दक्षताम् अर्जयितुं सिद्धाः स्युः।
5. माध्यमिकस्तरेषु अध्याप्यमानानां विषयाणां शैक्षणिकविश्लेषणाय क्षमतोत्पादनम् ।
6. तेषु वैयक्तिकशैक्षिकव्यावसायिकेषु क्षेत्रेषु छात्राणां मार्गदर्शनं कर्तुं क्षमतायाः विकाससाधनम्।
7. भाविशिक्षकाणां विभिन्नपरामर्शप्रविधिभिः छात्रसमस्यानां निराकरणसामर्थ्योत्पादनम् ।
8. तेषु विद्यार्थिषु रचनात्मकचिन्तनस्य अभिवृद्धिपूर्वकं ज्ञानस्य पुनर्निर्माणाय सामर्थ्यसम्पादनम् ।
9. कक्षायां प्रायोगिकाभ्यासेषु अपेक्षितानां प्रमुखानां कारकाणां परिचायनम्।
10. तेषु शैक्षिकादानत्वेन (इनपुट) सामाजिकसंसाधनानाम् अभिज्ञानपूर्वकं तेषाम् उपयोगकरणस्य ज्ञानसम्पादनम्।
11. छात्राध्यापकेषु शिक्षणाधिगमसामग्रीणां (TLM) अभिज्ञाने विकासकरणे च पटुत्वसम्पादनम्।
12. तेषां सञ्चारकौशलानां विकासे सूचनासम्प्रेषणप्रविधेः उपयोगे च नैपुण्यसम्पादनम्।

**3. अध्येतृवर्गः**

बी.ए.बी.एड. इति उपाधिधारकाः नवशिक्षानीतिः - 2020 इत्यस्य नूतनशिक्षाप्रणाल्यानुरूपं शिक्षायाः माध्यमिकस्तरेषु शिक्षकत्वेन कार्यं कर्तुम् अवसरं प्राप्स्यन्ति। अत्र प्रवेशः उच्चमाध्यमिकस्तरस्य (+2) तत्समकक्षपरीक्षायाः वा अनन्तरं अथवा विद्यालयस्य एनईपी- 2020 इत्यस्यानुगुणं 5+3+3+4 इति विद्यालयीयसंरचनायाम् उत्तीर्णतायाः परमेव अनुमन्यते। अयं पाठ्यक्रमः सर्वम् एकीकृत्य शिक्षकान् सक्षमान् करोति, तथैव तेषां स्वकार्यं यथासम्भवं प्रभावोत्पादकतया सम्पादयितुञ्च साहाय्यम् आचरति। अपि च विषयात्मकस्य व्यावसायिकज्ञानस्य च एकीकरणं सर्वेषु स्तरेषु (5+3+3+4) शिक्षणव्यवसाये अत्यन्तम् उत्तमानां प्रतिभावतां च नियुक्तेः आवश्यकतां पूरयति।

**4. अवधिः कार्यदिनानि च -**

**I. अवधिः**

बी.ए.बी.एड्. इति पाठ्यक्रमस्य अध्ययनावधिः चतुर्णां शैक्षिकवर्षाणां (अष्टानां सत्रार्द्धानाम्) यावत् भविष्यति । पाठ्यक्रमोऽयं प्रवेशस्य दिनाङ्कादारभ्य अधिकाधिकं षट्सु वर्षेषु समापयितुं शक्यते।

**II. कार्यदिवसाः**

अ. प्रत्येकं सत्रार्द्धे अन्त्यसत्रार्धपरीक्षाः विहाय 15 -16 सप्ताहानां शिक्षणाधिगमगतिविधयः भविष्यन्ति। एकस्मिन् सत्रार्धे सत्रार्धपरीक्षायाः दिनानि विहाय न्यूनातिन्यूनं 96 कार्यदिनानि भविष्यन्ति।

आ. प्रत्येकं कार्यसप्ताहे न्यूनातिन्यूनं 40 होराणां निर्देशात्मकसमयः/सम्पर्कसमयः भविष्यति। एतस्मिन् काले आवश्यकतानुसारं साहाय्यार्थं, मार्गदर्शनार्थं, संवादार्थं, परामर्शार्थञ्च च छात्रप्रशिक्षकयोः उपलब्धतां सुनिश्चेतुं सर्वेषां शिक्षकाणां छात्राध्यापकानां च संस्थायां भौतिकोपस्थितिः आवश्यकी।

इ. कक्षाशिक्षणेन संरचितान्तःक्रियया च सम्बद्धे अध्याप्यमाने पाठ्यक्रमे एकस्मिन् सत्रार्द्धे प्रत्येकं श्रेयोऽङ्केषु न्यूनातिन्यूनं 15 होराणां निर्देशात्मकसमयस्य/सम्पर्कसमयस्य आवश्यकता भवति। प्रायोगिकेषु छात्राणां कृते कस्यापि अनुमोदितपरियोजनायां व्यावहारिकगतिविधिषु वा भागं ग्रहीतुम् एकस्मिन् सत्रार्द्धे प्रत्येकं श्रेयोऽङ्के न्यूनातिन्यूनं 30 होराणां नियोजनम् अनिवार्यं भविष्यति। नियमोऽयं संगोष्ठी, प्रशिक्षुता, प्रयोगशालाधारितगतिविधयः, प्रसारक्रियाकलापाः, कार्यशालाधारितक्रियाकलापाः, क्षेत्राधारितपरियोजना, अभ्यासः, सामाजिकसहभागिता सेवा चेत्यादिषु क्रियाकलापेषु अनुप्रयुक्तः भविष्यति।



YsRamesh

ई. छात्राध्यापकानां न्यूनतमोपस्थितिः सर्वेषु पाठ्यक्रमकार्येषु प्रायोगिकेषु च 80% विद्यालयानुभव-व्यावसायिकक्षमतोन्नयनं सामुदायिकसेवादिगतिविधिषु च 90% भविष्यति।

**5. स्थानानि**

केन्द्रीयसंस्कृतविश्वविद्यालयस्य विभिन्नेषु परिसरेषु (त्रिशूर-भोपाल-जयपुरेषु) बी.ए.बी.एड्. इति पाठ्यक्रमे 300 स्थानानि निर्धारितानि सन्ति। सहभागितापूर्णशिक्षणाय अधिगमसौविध्याय च पाठ्यक्रमस्य पद्धतीनाम् अन्येषां प्रायोगिकगतिविधीनाञ्च कृते एकस्य विषयस्य अध्यापनाय प्रतिशिक्षकं पञ्चविंशतेः अधिकाः छात्राः न स्युः।

**6. निर्देशस्य परीक्षायाश्च माध्यमः**

आधुनिकभाषासाहित्यं विहाय पाठनस्य परीक्षायाः च माध्यमः संस्कृतम् अस्ति ।

**7. योग्यता**

बी.ए.बी.एड्. इति पाठ्यक्रमे प्रवेशार्थम् इच्छुकानाम् अभ्यर्थिनां सविधे अधोलिखितरीत्या पात्रता परिकल्पिता अस्ति -

मान्यताप्राप्तमण्डलात्/परिषदः/विश्वविद्यालयात् वा 50% अङ्कैः समकक्षश्रेण्यां वा द्वादशी कक्षा/ उत्तरमध्यमा/प्राक्शास्त्री/ वरिष्ठोपाध्यायः/ PUC / +2 समकक्षपरीक्षोत्तीर्णः ।

**8. स्थानानाम् आरक्षणम्**

स्थानानाम् आरक्षणं भारतसर्वकारस्य प्रवर्तमानस्य मानदण्डानुसारं भविष्यति।

**9. प्रवेशप्रक्रिया -**

प्रवेशः योग्यतायाः आधारेण प्रदीयते । बी.ए.बी.एड्. इति पाठ्यक्रमे प्रवेशार्थं मेधासूची निम्नलिखिताधारेण निर्मीयते -

1. NTA द्वारा आयोजितायां NCET- प्रवेशपरीक्षायां प्राप्तानाम् अङ्कानां प्रतिशतम्/शततमकम्।

## 10. एकीकृतशिक्षकशिक्षाकार्यक्रमस्य शुल्कविवरणम् –

### प्रथमवर्षशुल्कम्
### (प्रथमद्वितीयसत्रार्द्धयोः)

| क्रं सं. | विवरणम् | शुल्कम् (रूप्यकाणि) |
|---|---|---|
| 1 | प्रवेशः | 300 |
| 2 | प्रवेशप्रक्रिया | 200 |
| 3 | नामाङ्कनम् | 100 |
| 4 | पुस्तकालयस्य सुरक्षितधनराशिः (वर्षान्ते छात्रेभ्यः प्रत्यर्पयिष्यते) | 400 |
| 5 | परिचयपत्रम् | 100 |
| 6 | छात्रकल्याणम् | 400 |
| 7 | दीक्षारम्भः स्वशास्त्रीयवैज्ञानिकपरियोजना (भा.ज्ञा.प. आधारिता) ‡ | 2000 |
| 8 | विद्याशाखीयपत्रिका‡ | 100 |
| 9 | छात्रपत्रिका | 200 |
| 10 | विविधप्रवृत्तिः (पाठ्यक्रमे उल्लिखितानां विभिन्नगतिविधिनां प्रायोगिककार्याणां च कृते)‡ | 7000 |
| 11 | पुस्तकालयसेवा | 400 |
| 12 | क्रीडा | 200 |
| 13 | शिक्षणशुल्कम् * | 2000 |
| 14 | सूचनासम्प्रेषणप्रौद्योगकीसौविध्यम्‡ | 300 |
| 15 | विशिष्टव्याख्यानम्/संङ्गोष्ठी‡ | 500 |
| 16 | शिक्षणोपकरणमञ्जूषा‡ | 1000 |
| 17 | विद्याशाखा विकासनिधीः‡ (अधोसंरचनायै) | 3000 |
| | **योग** | **18,200** |

*__विशेष__:–1. प्रतिसत्रार्द्धं परीक्षाशुल्कम् अतिरिक्तं देयः भविष्यति।

1. अनुसूचितजातिभ्यः अनुसूचितजनजातिभ्यः दिव्याङ्गेभ्यश्च शिक्षणशुल्के 50% निर्मुक्तिः भविष्यति । इत्यतः 17,200/- शुल्करूपेण देयानि।



YSRawem

‡ शुल्कमिदं शिक्षाशास्त्रविशेषछात्रकोषत्वेन परिगण्यते। अस्य व्ययः अधोलिखितरीत्या संरचितया समित्या भविष्यति –

**संयोजकः**– शिक्षाशास्त्रविद्याशाखाध्यक्षः।

**समन्वयकः**–ITEP इति कार्यक्रमस्य समन्वयकः।

**सदस्याः** - शिक्षाशास्त्रविद्याशाखायाः त्रयः प्राध्यापकाः।

**छात्रसदस्याः** - ITEP इति कार्यक्रमस्य प्रवेशपरीक्षायाम् अथवा गतपरीक्षायां सर्वाधिकाङ्कान् प्राप्तवन्तौ प्रत्येककक्षाया एकैकौ महिलापुरुषच्छात्रौ।

**अ. छात्रावासस्य भोजनस्य च शुल्कम् -** पात्राणां बालकबालिकानां कृते पृथक्पृथक् छात्रावासभोजनसौविध्यं समुपलभ्यते। कार्यक्रमप्रवेशशुल्कं विहाय छात्रावासशुल्कं, पाकशालाशुल्कं च छात्रैः पृथक्पृथक् वहनीयम्।

**12. उपस्थितिः**

1. छात्रशिक्षकाणां न्यूनतमा उपस्थितिः सम्पूर्णसैद्धान्तिकपाठ्यक्रमस्य कृते 80%, विद्यालयानुभव-व्यावसायिकक्षमतोन्नयनं सामुदायिकसेवादिगतिविधिषु च 90% अस्ति।
2. येषां छात्राणां पर्याप्ता उपस्थितिः न भविष्यति, तेषां कृते केन्द्रीयसंस्कृतविश्वविद्यालयेन अन्यया वा सर्वकारीयसंस्थया अर्धसर्वकारीयसंस्थया वा कस्यापि छात्रवृत्तेः अथवा केनापि प्रकारस्य आर्थिकसाहाय्यार्थं पुरस्कर्तुं वा विचारः न भविष्यति।
3. येषां छात्राणां पर्याप्ता उपस्थितिः नास्ति तेषां परीक्षायां कथमपि प्रवेशः न भविष्यति।
4. केन्द्रीयसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रविद्याशाखायाः निर्धारितपञ्चाङ्गानुसारं प्रवेशारम्भदिनाङ्कात् उपस्थितेः गणना भविष्यति।
5. येषु आन्तरिकगतिविधिषु अङ्काः प्रदीयन्ते, ताः सर्वाः अनिवार्याः सन्ति।
6. अनुमतिं विना दशदिनानां सततानुपस्थितिः भवति चेत् विभागाध्यक्षस्य अनुशंसया निदेशकः प्रवेशनिरसनं कर्तुं शक्नोति।

## चतुर्वर्षीयः एकीकृतशिक्षकशिक्षाकार्यक्रमः

## (Four Year Integrated Teacher Education Programme)

### प्रथमः सत्रार्द्धः (Semester I)

### द्विसाप्ताहिकः दीक्षारम्भकार्यक्रमः

### (Two Weeks Student Induction Programme)

विविधसामाजिक-आर्थिक-भाषिकपृष्ठभूमिभ्यः द्वादशीं तत्समकक्षां वा समुत्तीर्य ये अध्येतारः चतुर्वर्षीय बी.ए.बी.एड (संस्कृत) कार्यक्रमं प्रविशन्ति तान् दीक्षारम्भकार्यक्रमः महदुपकरोति।

कार्यक्रमोऽयं परिसरीयवातावरणेन विश्वविद्यालयीय संस्कृत्या-आनुकूल्यं सम्पादयितुं, सहाध्यायिभिः विद्यशाखीयप्रशिक्षकैः सह परस्परं सामञ्जस्यं स्थापयितुं, वातावरणं चावगन्तुं नूनम् अभिप्रेरकः भविष्यति।

दीक्षां विना संस्कृतानभिज्ञाः, संस्कृतभाषाश्रवणेन वञ्चिताः, संस्कृतसम्भाषणेनानभ्यस्ताश्च ये उच्चारण-लेखनादिकाः क्रियाः कुर्वन्ति, तेषां न भाषात्वसिद्धिः न च अभिव्यञ्जनशक्तिः। तस्मात् गुरुभिः प्रशिक्षकैः नवागन्तुकाः दीक्षिताः भुवेयुरिति सुचिन्तितः कार्यक्रमः 'दीक्षारम्भकार्यक्रमः'। दीक्षा नाम नियमाचरणम्। केन्द्रीयसंस्कृतविश्वविद्यालयस्य ये नियमाः ये स्वप्नाः, याः योजनाः तेषां, तासां च परिचयमवाप्य तदर्थ प्रवर्तनाय सङ्कल्पितः द्विसाप्ताहिकः दीक्षारम्भकार्यक्रमोऽयं प्रथम सत्रार्द्धस्य प्रारम्भ एव आवासीयः आयोज्यते।

सप्ताहद्वयव्यापिनः कार्यक्रमस्यास्य चतुर्वर्षीय-एकीकृतशिक्षकशिक्षा (B.A.B.Ed.) कार्यक्रमस्य स्वरूपावबोधनम्, शास्त्री-शिक्षाशास्त्री कक्षयोः एकीकृतसंस्कृतपाठ्यक्रमस्य संरचनायाः स्फुटीकरणम्, माध्यमिकस्तरस्य (Secondary Level) (नवमीकक्षातः द्वादशकक्षां यावत्) शिक्षकाः यूयं भविष्यथ इति लक्ष्योपस्थापनं चेति उद्देश्यानि पूरयितुमायोज्यते दीक्षारम्भकार्यक्रमोऽयम्।

**दीक्षारम्भकार्यक्रमस्य परिणामाः**

- संस्कृतभाषायाः श्रवणेन-अभ्यस्ताः भविष्यन्ति।
- संस्कृतभाषया सम्भाषितुमभिप्रेरिताः भविष्यन्ति।
- सामूहिकक्रीडा-व्यायामादि गतिविधीनां माध्यमेन सामूहिक भावनया सह सामञ्जस्य स्थापनं कथमिति बोधिष्यन्ति।
- विभिन्नैः प्रेरकव्याख्यानैः सांस्कृतिक-कलात्मक गतिविधिषु सक्रियतामनुभविष्यन्ति।



YSRamu

- विश्वविद्यालयस्य परिसरस्य च समग्रपरिचयेन विविधविद्यास्थानानां, विद्याशाखानां, योजनानां परिचयेन च स्पष्टमतयो भविष्यन्ति।
- राष्ट्रियशिक्षानीतेः (2020) विद्यालयीयसंरचनायां (5+3+3+4) एनसीटीई संस्थायाः ITEP कार्यक्रमं ससन्दर्भं सुष्ठु ज्ञास्यन्ति।
- चतुर्वर्षीय-एकीकृतकार्यक्रमस्य अष्टानां सत्रार्द्धानाम् अध्ययनविषयाणां परिचयं लप्स्यन्ते।
- अध्ययनक्षेत्रेषु गहनसङ्गतेः आवश्यकताम् अवगमिष्यन्ति।
- प्रत्येकम् अध्ययनविषयस्य निर्धारितां श्रेयोऽङ्कव्यवस्थां बोधिष्यन्ति।

**प्रवचनप्रक्रिया**

अभिनय-वस्तु/चित्रप्रदर्शन-प्रश्नोत्तर-क्रीडा-प्रेरकव्याख्यानादिभिः विधिप्रविधिभिः द्विसाप्ताहिकोऽयं दीक्षारम्भकार्यक्रमः नवागन्तुकच्छात्रेषु संस्कृतज्ञानसंस्कारं जनयेत्।

**सम्भाषणशिक्षणम्**

दशसु दिनेषु समयसारिण्यां प्रतिदिनं घण्टाद्वयं प्रकल्पनीयम्। दशदिनेभ्यः परं 'भाषणकेन्द्रितस्पर्धाः' दिनत्रयं (प्रतिदिनं द्वौ कालांशो) आयोजनीयाः।

- कथाकथनस्पर्धा। एकश्वासेन सम्भाषणस्पर्धा।
- समकालिक-आंग्लपदानां संस्कृतरूपकथनस्पर्धा (सूची प्रदास्यते)
- शब्दानां लिङ्गकथनस्पर्धा, सङ्ख्यावाचकशब्दानाम् आरोहावरोहक्रमेण कथनस्पर्धा।

**व्यक्तित्वविकासाय विशिष्टव्याख्यानपञ्चकम्**

- 'अद्भुतं संस्कृतम्' इति शीर्षकमवलम्ब्य सरलसंस्कृतेन संस्कृतभाषायाः वैशिष्ट्योपस्थापनम्।
- डिजिटलदुनिया, संस्कृतविकिपीडिया वैद्युतीयसामग्री - एतत्सन्दर्भे व्याख्यानम्।
- ललितकलानां (प्रदर्शनकलाः, दृश्यकलाः, लोककलाः) सन्दर्भे आकर्षकं ज्ञानदायकं व्याख्यानम्।
- स्वच्छताभियानम् (गृहं-कक्षा-परिसरः-समाजः) अधिकृत्य प्रेरकं व्याख्यानम्।
- संस्कृतगीतानां गानाभ्यासः, बौद्धिक-शारीरिक-भाषाक्रीडानामभ्यासः।

**सर्जनात्मकरचनाप्रशिक्षणम्**

- द्विपदात्मक-त्रिपदात्मक-सविशेषण-संमिश्र वाक्यरचनाभ्यासाय कालांशाः आयोजनीयाः।
- चित्रं दृष्ट्वा रचनाकार्यम्



YSRamesh

- संवादं श्रुत्वा सारलेखनम्
- शीर्षकमवलम्ब्य अनुच्छेदलेखनम्

**वेगपठनकौशलम्**

- शास्त्रग्रन्थपङ्क्तीनां पठनाभ्यासः
- अपठित गद्य-पद्य-कथानां वेगपठनाभ्यसः

**भित्तिपत्राणां वैज्ञानिकपत्रपत्रिकाणां प्रदर्शिनी**

**आकलनप्रक्रिया**

- दीक्षारम्भकार्यक्रमे प्रत्येकम् अध्येतुः अवगमनस्तरस्य - अधिगमस्तरस्य चाकलनम्
- संस्कृतभाषाश्रवणकौशलपरीक्षणम्
- संस्कृतेन सम्भाषणप्रवृत्तिपरीक्षणम्
- व्यवहारगतपरिवर्तनस्य (सप्ताहद्वये) आकलनम्
- नियमितता - अधिगमसामर्थ्यपरीक्षणम्

**दीक्षारम्भकार्यक्रमे छात्राध्यापकप्रवेशशुल्कादेव व्ययः करणीयः।**

- सम्भाषणशिक्षणाय स्थानीय संस्कृतभारत्यः। कार्यक्रत्रोः द्वयोः दशदिनानां कृते नियोजनम् करणीयम्।
- विशिष्टव्याख्यानानां कृते योग्यानां वक्तृत्वकलाविदां, सरलंसंस्कृतभाषया विषयोपस्थापकानाम् आमन्त्रणं करणीयम्।
- भोजन-आवासप्रबन्धनं सुनियोजितरूपेण करणीयम्।
- संस्कृतमयवातावरणं शि.शा. विद्याशाखीयैः ITEP प्रशिक्षकैः निष्ठया रचनीयम्।
- अनुशासनाय सर्वैरपि श्रद्धया यतनीयम्।
- सप्ताहद्वयस्य समयसारिणी निर्मेया। एतद्विषये प्रशिक्षकाणाम् अभिमुखीकरणकार्यक्रमे चर्चा करिष्यते।



JS Raman

## प्रथमः सत्रार्द्धः (I[st] Semester)

| क्रं.सं. | पाठ्यचर्यात्मकघटकाः | पाठ्यविषयाः | प्रतिसत्रार्धं श्रेयोऽङ्काः प्रथमसत्रार्द्धः | पाठ्यविषयशः श्रेयोऽङ्काः |
|---|---|---|---|---|
| 2.1 | शिक्षायाः आधाराः | भारतीयशिक्षायाः विकासः | 4 | 4 |
| 3.1 | * (किमपि एकं शास्त्रं चिनोतु)<br>**शास्त्रीयविषयाः/ अन्तःशास्त्रीयविषयाः (विद्यालयपाठ्यचर्यातः)** | **साहित्यम् (प्रथमपत्र) -**<br>साहित्यशास्त्रस्य सामान्यपरिचयः<br>**साहित्यम् (द्वितीयपत्र) -**<br>शिशुपालवधे वर्णिता राजनीतिः<br>(शिशुपालवधम्-द्वितीयः सर्गः) | 4 + 4 | 8 |
| | | **व्याकरणम् (प्रथमपत्र) -**<br>सञ्ज्ञापरिभाषाच्सन्धिप्रकृतिभावाः<br>**व्याकरणम् (द्वितीयपत्र) -**<br>विभक्त्यर्थविचारः | 4 + 4 | |
| | | **दर्शनम् (प्रथमपत्र) --**<br>पाठ्यपरिचयः<br>**दर्शनम् (द्वितीयपत्र) --**<br>पाठ्यपरिचयः | 4 + 4 | |
| | | **ज्योतिषम् (प्रथमपत्र) -**<br>पाठ्यपरिचयः फलितज्योतिषम्<br>**ज्योतिषम् (द्वितीयपत्र) -**<br>पाठ्यपरिचयः सिद्धान्तज्योतिषम् | 4 + 4 | |
| 3.2 | * (एकम् आधुनिकं विषयं चिनोतु) | **हिन्दी** - हिन्दी साहित्य का इतिहास | 4 | 4 |
| | | **English** Literature | | |
| | | **मलयालम्** - Malayalam Literature ( Regeonal Language) | | |
| | | **इतिहासः** - भारत बोध | | |
| | | **राजनीतिशास्त्र**- राजनीतिक विज्ञान के मूलाधार | | |
| | | **रङ्गमञ्च** - पाठ्यपरिचयः- नाट्योत्पत्तिः, रङ्गमण्डपः, ताण्डवलक्षणम्, अङ्गहारविधानम्, करणविधानञ्च | | |
| 5.1 | योग्यतासंवर्धनं मूल्यसंवर्धित-पाठ्यविषयाश्च | सम्प्रेषणात्मकं संस्कृतम् | 4 | 4 |
| | | कलाशिक्षा (प्रदर्शनकलाः दृश्यकलाश्च) | 2 | 2 |
| 5.4 | | भारतावबोधः (मान्यताः ज्ञानप्रणाली च) | 2 | 2 |
| | | **आहत्य श्रेयोऽङ्काः** | **24** | **24** |

## 2.0 शिक्षायाः आधाराः

## 2.1भारतीयशिक्षायाः विकासः

**सत्रार्द्धः–1** **श्रेयोऽङ्काः– 4**

### 2.1.1 पाठ्यपरिचयः

शिक्षायाः बृहत्काये उपक्रमे छात्राध्यापकाः भारतीयशिक्षायाः समुद्भवं विकासं च अवगन्तुं प्रवृत्ताः भवेयुः। ते भारतीयशिक्षायाः परिप्रेक्ष्ये शिक्षाकेन्द्ररूपेण गुरुकुलानां मठमन्दिरादिषु विद्यमानानां पाठशालानां च वैशिष्ट्यंजानीयुः। बौद्ध-जैन-मठेषु, विहारेषु चैत्यशालासु च विद्यमानानां शिक्षाकेन्द्राणां वैशिष्ट्यं जानीयुः। ते मध्ययुगे प्रचलितानां मकतब्-मदरसा-प्रभृतीनां शिक्षाकेन्द्राणां वैशिष्ट्यं जानीयुः। ते आङ्ग्लयुगे प्रचलितानां शिक्षाकेन्द्राणां वैशिष्ट्यं अवगच्छेयुः। ते एतेषां सर्वेषां शिक्षाकेन्द्राणां विशिष्टतत्त्वानां वर्तमानशिक्षाकेन्द्रेषु सन्निवेशस्य उपक्रमं जानीयुः। ते शैक्षिकस्तरस्य उन्नयनाय प्रवर्तेरन्। अपि चछात्राध्यापकाः भारतीयशिक्षायाः परिष्कारे सावित्रीबाईफुलेवर्यायाः, ज्योतिबाफुलेमहोदयस्य, स्वामिदयानन्दस्य, स्वामिविवेकानन्दस्य, महर्षि-अरविन्दस्य, रवीन्द्रनाथठाकुरस्य, महात्मगान्धिनः, गिजुभाई-बधेकावर्यस्य, महामना-मालवीयस्य, जे. कृष्णमूर्तिनः, भीमराव-अम्बेडकरवर्यस्य चेत्येतेषां भारतीयशिक्षाशास्त्रिणाम् अवदानेन सुपरिचिताः भवेयुः इति।

### 2.1.2 अधिगमपरिणामाः

एतस्य पाठ्यक्रमस्यसमाप्तेः अनन्तरं छात्राध्यापकाः अधोलिखितानां ज्ञाने समर्थाः भविष्यन्ति। यथा हि –

- प्राक्कालात् साम्प्रतं यावत् भारतीयशिक्षायाः स्वरूपं परिशील्य तस्याः कार्यान्वयने शक्ताः भविष्यन्ति।
- भारतीयशिक्षाकेन्द्रेषु प्रचलितैः शिक्षणविधिभिः सुपरिचिताः भविष्यन्ति।
- प्राचीनानां भारतीयशिक्षाकेन्द्राणां प्रबन्धनं वित्तव्यवस्थां च ज्ञास्यन्ति।
- शिक्षायां भारतीयशिक्षाशास्त्रिणाम् अवदानेन परिचिताः भविष्यन्ति।

**पाठ्यांशः - 1**

**वैदिकशिक्षा**

1. वैदिकशिक्षायाः सम्प्रत्ययः, उद्देश्यानि, वैशिष्ट्यानि पाठ्यचर्या च।



YS Rawano

1. प्रसिद्धगुरुकुलैः सह परिचयः प्रसिद्धाः गुरुशिष्याः च।
2. शिक्षण-अधिगम-प्रक्रिया।
3. रामायणकालिका महाभारतकालिका च शिक्षा।
4. शैक्षिकसंस्थानां विकासः, वित्तीयविकासः प्रबन्धकीयविकासः च।

## पाठ्यांशः 2

## जैन-बौद्ध-शिक्षा

1. जैन-बौद्ध-शिक्षायाः सम्प्रत्ययः, उद्देश्यानि, वैशिष्ट्यानि पाठ्यचर्या च।
2. प्रसिद्धाः गुरुशिष्याः।
3. शिक्षण-अधिगम-प्रक्रिया।
4. शिक्षाकेन्द्राणि – तक्षशिला, नालन्दा, वल्लभी, विक्रमशिला चेति।
5. शैक्षिकसंस्थानां प्रबन्धनं वित्तव्यवस्था च।

## पाठ्यांशः 3

## गुप्तोत्तरकालिका औपनिवेशिकयुगीया च शिक्षा

1. गुप्तोत्तरकालस्य औपनिवेशिककालस्य च दृष्टिकोणः, उद्देश्यानि, संक्षिप्त-ऐतिहासिकविकासस्य परिप्रेक्ष्यम्, तेन सह भारते शिक्षायाः मुख्याः विशेषताः।
2. शिक्षणस्य अधिगमस्य च प्रक्रिया।
3. शैक्षणिकसंस्थानां प्रबन्धनं वित्तव्यवस्था च ।

## पाठ्यांशः - 4

## आधुनिकीभारतीया शिक्षा

1. वुडघोषणापत्रम् (वुड्सडिस्पैच) 1854, भारतीयशिक्षायोगः1882, प्राच्य-पाश्चात्त्यविवादः, मैकाले-विवरण-पत्रम्, भारतीयशिक्षायाः पाश्चात्त्यीकरणम्।
2. शिक्षायाः भारतीयकरणाय ज्योतिबाफुलेमहोदयः, सावित्रीबाईफुलेमहोदया, स्वामिदयाननन्दः, स्वामिविवेकाननन्दः, महर्षि-अरविन्दः, रवीन्द्रनाथठाकुरः, महात्मागान्धी, गिजुभाईबधेकामहोदयः, महामना-मालवीयः, जे. कृष्णमूर्ती, भीमराव-अम्बेडकरः चेत्यादीनां भारतीयशिक्षाशास्त्रिणां अवदानम्।
3. स्वतन्त्रभारते शिक्षा - संवैधानिकमूल्यानां शैक्षिकप्रावधानानाञ्च अवलोकनम्।
4. नागरिकता शिक्षा :

- उत्तमस्य नागरिकस्य गुणाः।
- मौलिकाधिकाराणां कर्तव्यानां च कृते शिक्षा।

5. 20 शताब्द्याः समितिनाम्, आयोगानां, नीतीनां च अवलोकनम्।
6. UEE, RMSA, RTE 2009: अवलोकनं प्रभावश्च।
7. NEP 2020: - जीवन्तस्य भारतस्य दृष्टिः कार्यान्वयनञ्च।

**2.1.3 प्रायोगिकम्**

1. वैदिककाले विद्यमानानां गुरुकुलीयगुणानां प्रयोगपुरस्सरं साम्प्रतिके काले तस्य आदर्शरूपम् अधिकृत्य कक्ष्यायां परिचर्चायाः आयोजनम्।

अथवा

भारतीयशास्त्रानुगुणं छात्रेषु गुणानां विमर्शनं विधाय आदर्शस्य छात्रस्य स्वरूपनिर्माणम्।

2. जैनग्रन्थेषु शिक्षणविधीनां गुणानां साम्प्रतिके काले अनुप्रयोगस्य विमर्शनाय परिचर्यायाः आयोजनम्।

अथवा

बौद्धग्रन्थेषु निरूपितानां शिक्षणविधीनां साम्प्रतिके काले अनुप्रयोगस्य प्रस्तावविश्लेषणम्।

3. भारतीयसंविधाने शैक्षिकप्रावधानानां मूल्याङ्कनं विधाय तस्य कार्यान्वयने काठिन्यानां विमर्शनम्।

अथवा

स्थानीयस्तरे शिक्षाक्षेत्रे समर्पितस्य जनस्य विषये परिचयात्मकं विमर्शनम्।

4. आदर्शशिक्षाकेन्द्रस्य स्वरूपनिर्धारणम्।

अथवा

राष्ट्रीयशिक्षानीतेः (2020 इत्यस्य) प्रस्तावनायाः विमर्शनाय वादविवादस्य आयोजनम्।

**2.1.4 प्रवचनप्रक्रिया**

पाठ्यक्रमसामग्र्याः प्रवचनप्रक्रियायां विविधाः पाठ्यांशाः समाविष्टाः भविष्यन्ति। यथा हि–

- बहुमाध्यमयुक्तं शक्तिबिन्दुप्रदर्शनप्रभृति (पॉवरपाइंटप्रजेण्टेशन) प्रस्तुतियुतं योजनाबद्धं व्याख्यानम्।

- लघुसमूहेषु परिचर्चा, सामूहिकी परिचर्चा, समूहानां पारस्परिकी चर्चा, लघुविषयेषु केन्द्रिता सङ्गोष्ठी, सहयोगात्मकं शिक्षणम्, दलशिक्षणम्, पाठ्यांशात् चितस्य अंशस्य पठनम्, वृत्ताध्ययनम्, शैक्षिकस्य प्रदत्तांशस्य साङ्ख्यिकीयं विश्लेषणम्, शैक्षणिकरूपेण वञ्चितसमुदायानां समूहानां च लक्षित-समूहविषये चर्चामाध्यमेन वैयक्तिकरूपेण क्षेत्रपर्यटनेन वा अध्ययनम्, सर्वेक्षणम्, अल्पकालिकं परियोजनाकार्यं च।
- विविधैः बालसमूहैः, समुदायैः, विद्यालयैः च सह व्यावहारिकानुभवानां प्रदर्शनम्।

**2.1.5 आकलनप्रक्रिया**

परीक्षणाधारितं सत्रीयकार्याधारितं च आकलनं भविष्यति।

**2.1.6 स्वाध्यायसामग्री**


1. मिश्रः, लोकमान्यः, भारतीया पुरातनी शिक्षा, मृगाक्षी प्रकाशनम्, गोमती नगर, लखनऊ-226010- 2013
2. मिश्रः, लोकमान्यः, भारतीया आधुनिक शिक्षा, मृगाक्षी प्रकाशनम्, गोमती नगर, लखनऊ-226010-2013
3. शैन, के. के., भारतीयमाध्यमिकशिक्षा, मान्यता प्रकाशन, दिल्ली - 2016
4. शैन, के. के., भारतीयशैक्षिकसमस्याः, मान्यता प्रकाशन, दिल्ली - 2016
5. पात्रः, वृन्दावनः, भारते शिक्षाप्रणाल्याः विकासः, दिव्या प्रकाशन, भुवनेश्वर - 2013
6. झाः, सुरेन्द्रः, प्राचीनभारतीयशिक्षापद्धतिः, 2/212, विराट खण्ड, गोमती नगर, लखनऊ-2002
7. अल्तेकर, अनन्त सदाशिव, प्राचीन भारत में शिक्षा, ज्ञान पब्लिशिंग हाउस, दिल्ली - 2009
8. पाठक, पी. डी., भारतीय शिक्षा और उसकी समस्याएँ, विनोद पुस्तक मन्दिर, आगरा
9. रस्तोगी के.जी. भारतीय शिक्षा का इतिहास एवं समस्याएँ, विनोद पुस्तक मन्दिर, आगरा
10. अग्निहोत्री, रवीन्द्रः, आधुनिक भारतीय शिक्षा : समस्याएँ और समाधान, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर - 2008
11. कछवाहः, अशोककुमार, समसामयिक भारत में शिक्षा, संदर्भ प्रकाशन, भोपाल - 2019
12. पाठक, दाताराम, अतीत एवं वर्तमान में शैक्षिक प्रणाली, मान्यता प्रकाशन, दिल्ली।




YSRamanu

13. Govt. of India (1986), National Policy of Education MHRD, New Delhi
14. Govt. of India (1952-53) : Report of the Secondary Education Commission.
15. Govt. of India (1964-66), Education Commission.
16. Govt. of India (2009) : Right to Education, Ministry of Law and Justice.
17. Anand, C.L. (1983) : Teacher and Education in Emerging Indian Society, NCERT, New Delhi.
18. National Policy of Education, 2020 Govt of India.

3.1.1

**सत्रार्द्धः**- 1 **श्रेयोऽङ्कः**:-4

**पाठ्यपरिचयः**- (About the course) - **साहित्यशास्त्रस्य सामान्यपरिचयः**

अत्र साहित्यशास्त्रस्य सामान्येन परिचयः प्रस्तुतः। इह साहित्येति नाम्नोऽर्थः, साहित्यशास्त्रस्य प्रमुखाः ग्रन्थाः, काव्यस्य प्रयोजनम्, कारणम्, भेदाः, गुणाः, अलंकाराश्च सामान्येन प्रतिपादितानि सन्ति। साहित्यं नाम मानवस्य आत्मा। साहित्यं विना मनुष्यः पुच्छेन शृङ्गेण च रहितः सहायहीनः पशुः। साहित्यमेव काव्यपदेनापि कथ्यते। यत् शास्त्रम् एतस्य साहित्यस्य स्वरूपं प्रयोजनं घटकानि च प्रतिपादयति तदेव साहित्यशास्त्रम् उच्यते। इदमेव काव्यशास्त्रम् अलंकारशास्त्रं चोच्यते। अस्य साहित्यशास्त्रस्य प्रमुखं प्रमेयं काव्यमेव विद्यते, तदङ्गत्वेन तस्य प्रयोजनम्, कारणम्, भेदाः, गुणाः,अलंकाराश्चापि अत्र विवेचिता भवन्ति। अत्र काव्ये हेया दोषा आपि विचार्यन्ते। एषामेव सामान्येन विवेचनम् अत्र विद्यते।

**अधिगमपरिणामः ( Learning Outcome)-**

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- साहित्यशब्दार्थं बोधयितुं शक्ष्यन्ति।
- साहित्यशास्त्रस्य प्रमुखान् ग्रन्थान् प्रतिपादयितुं प्रभविष्यन्ति।
- सप्रयोजनस्य, सकारणस्य, सभेदस्य च काव्यस्यावबोधे शक्ता भविष्यन्ति।
- सभेदस्य गुणस्य परिचयं प्राप्स्यन्ति।
- काव्यदोषस्यावबोधे समर्था भविष्यन्ति।
- सभेदमलंकारम् अवगिष्यन्ति।
- साहित्यशास्त्रस्य प्रमेयाणाम् अध्यापने कौशलं लप्स्यन्ते।

| **पाठ्यांशः** (Unit) | **विवरणम्** |
|---|---|
| 1. **साहित्यशास्त्रस्य नामकरणं तद्ग्रन्थाश्च**- (1) | • साहित्यशब्दार्थः<br>• साहित्यशास्त्रस्य नामानि<br>• साहित्यशास्त्रस्य ग्रन्था :<br>(नाट्यशास्त्रम्, काव्यादर्शः, भामहकृतः |



Ys Raneew

काव्यालङ्कारः,
काव्यालङ्कारसूत्रवृत्तिः, ध्वन्यालोकः,
औचित्यविचारचर्चा, वक्रोक्तिजीवितम्,
व्यक्तिविवेकः, काव्यप्रकाशः,
साहित्यदर्पणः, रसगङ्गाधरः,
काव्यालङ्कारकारिका,
काव्यसत्यालोकः,अभिराजयशोभूषणम्,
अभिनवकाव्यालङ्कारसूत्रम्)

2. **काव्यस्य प्रयोजन-कारण-लक्षण-भेदाः**

- काव्यप्रयोजनम्
- काव्यकारणम्
- काव्यलक्षणम्
- काव्यभेदः

3. **गुणपरिचयः** (1)

- गुणस्वरूपम्
- गुणभेदः -
  - त्रयो गुणाः
  - दश गुणाः
  - विंशतिः गुणाः
  - विंशतेः गुणानाम् आलोचनं गुणत्रयवादस्य समर्थनञ्च।

4. **अलङ्कारपरिचयः** (1)

- अलङ्कारस्य सामान्यलक्षणम्
- अलङ्कारभेदः
  - शब्दालङ्कारः
  - अर्थालङ्कारः
  - उभयालङ्कारः

- गुणालङ्कारयोः भेदः

**प्रायोगिकम्** (Practicum)-

1. प्रदत्तविषयानुसारेण लेखनम्
2. प्रदत्तविषयानुसारेण वीडियोनिर्माणम्
3. प्रदत्तविषयानुसारेण भाषणम्
4. रघुवंशादौ लभ्यमानानां काव्यभेद-गुणालंकाराणां संग्रहः।

**प्रवचनप्रक्रिया** (Mode of Transaction)-

समीक्षात्मिका पद्धतिः आश्रयणीया। अनेकविषयसम्बद्धाः समीक्षात्मकग्रन्थाः पूर्वं विलोकनीयः तथा कार्यं येन साहित्यशास्त्रविषयकं ज्ञानसामान्यं छात्राध्यापकेषु जायते। पीपीटी-द्वाराऽपि सम्बद्धाविषयाः प्रदर्शनीयाः।

**आकलनप्रक्रिया** (Mode of Assessment)-

1. भाषाशुद्धिः
2. अभिव्यक्तिकौशलम्।
3. व्यवहारः।
4. प्रश्नमञ्चः।
5. नियमितता।
6. अधिगमसामर्थ्यम्, परियोजनाकार्याणि प्रयोगाकार्याणि च।

**स्वाध्यायसामग्री** (Reading Material)


1. काव्यप्रकाशः, मम्मटः, भट्टवामनाचार्यः, (भण्डारकर प्राच्यविद्या संशोधकमन्दिरम्-पब्लिकेशनम्, दिल्ली, 2008)
2. साहित्यदर्पणः, शालिग्रामशास्त्री, मोतीलाल बनारसीदास, नई दिल्ली, 2000
3. काव्यालंकारसूत्राणि, वामनः, श्रीगोपेन्द्रत्रिपुरहरभूपालः, चौखम्बासंस्कृत - सुरभारती प्रकाशनम्, वाराणसी, .2001
4. वक्रोक्तिजीवितम्, प्रो,रमाकान्तपण्डेयः, जगदीशपुस्तकालय, जयपुर-2005
5. काव्यात्ममीमांसा, डॉ जयमन्तमिश्रः, चौखम्बा, वाराणसी भवन, वि. 2005




YsRamesh

6. संस्कृतवाङ्मय का बृहद् इतिहास (काव्यशास्त्रखण्ड), प्रधानसम्पादकः- डा.बलदेवउपाध्याय, पं. वायुनन्दन पाण्डेय, उत्तरप्रदेशसंस्कृतसंस्थान, लखनऊ

3.1.2

**सत्रार्द्धः**-1 **श्रेयोऽङ्कः** - 4

**पाठ्यपरिचयः - शिशुपालवधे वर्णिता राजनीतिः (शिशुपालवधम्-द्वितीयः सर्गः)**

अत्र महाकविमाघरचितस्य शिशुपालवधमहाकाव्यस्य द्वितीयः सर्गो निर्धारितः, यत्र राजनीतिः प्रतिपादिता। अस्याध्ययनेन प्राचीनराजनीतेरवबोधो भविष्यति।

**अधिगमपरिणामः**( Learning Outcome)

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- महाकविमाघं तत्काव्यरचनारीतिं च परिचेष्यन्ति।
- राजनीतेः सिद्धान्तं बोधयितुं शक्ष्यन्ति।
- श्लोकव्याख्यानकौशलं प्राप्स्यन्ति।
- सम्बद्धव्याकरणादिशास्त्राणाम् अवगमे समर्था भविष्यन्ति।
- कस्यचित् सिद्धान्तस्य काव्यमाध्यमेन उपस्थापयितुं शक्ता भविष्यन्ति।
- महापुरुषस्य लक्षणं भोत्स्यन्ते।

| **पाठ्यांशः** (Unit) | **विवरणम्** |
|---|---|
| 1. **महाकाव्यपरम्परा** (1) | • प्रमुखमहाकाव्यानां परिचयः (रामायणम्, महाभारतम्,रघुवंशम्, कुमारसंभवम्, बुद्धचरितम्)<br>• माघस्य परिचयः<br>• शिशुपालवधस्य कथासारः |
| 2. **बलरामस्य उक्तेः याथार्थ्यम्** (1) | • महीयसां लक्षणम्<br>• बलरामस्य स्वरूपम्<br>• बलरामस्य उक्तौ दण्डनीतेः महत्त्वम् |



JSRamana

| | |
|---|---|
| | • बलरामेन कृता श्रीकृष्णवचनस्य प्रशंसा |
| 3. **बलरामोक्तौ युक्तीनाम् उपस्थापना** (1) | • वक्तुम् उपस्थितस्य उद्धवस्य कृते आक्षेपः<br>• शिशुपालं प्रति आक्रमणे युक्तेरुपस्थापना<br>• यादवसेनायाः शक्तेरतिशयः<br>• यादवसेनां प्रति कर्तव्यविषये बलरामस्य संदेशः |
| 4. **उद्धवस्योक्तौ सामनीतेर्महत्त्वम्** (1) | • उद्धवेन कृता बलरामस्य उक्तेः प्रशंसा<br>• सत्कविना शब्दार्थयोराश्रयणम् इव राज्ञा पौरुषभाग्ययोः आश्रयणम्<br>• शिशुपालं प्रति आक्रमणं नोचितम् इति पक्षे उद्धवस्य युक्तिः<br>• शब्दविद्या इव राजनीतिः अपस्पशा नो भाति। |

**प्रायोगिकम्** (Practicum)

1. श्लोकोच्चारणम्।
2. श्लोकस्मरणम्।
3. श्लोकव्याख्यानम्।



Ysramu

4. प्रदत्तश्लोकानुसारेण बीडियोनिर्माणम्।

5. वाच्यपरिवर्तनम्।

6. सुबन्त-तिङन्त-समस्तादिपदानां संग्रहः।

**प्रवचनप्रक्रिया** (Mode of Transaction) -

खण्डान्वयः दण्डान्वयश्च विधिराश्रयणीयः पूर्वं श्लोकाः सस्वरम् उच्चारणीयाः। पद-पदार्थादिपरिचयः कारयितव्यः। श्लोकसम्बद्धानि शास्त्रान्तरतत्त्वानि अपि बोधनीयानि। समासविग्रहादिः कार्यः। तथा विधेयम् येन छात्राध्यापकेषु श्लोकव्याख्यानकौशलं वर्धेत।

**आकलनप्रक्रिया** (Mode of Assessment)

1. श्लोकोच्चारणशुद्धिः।
2. अभिव्यक्तिकौशलम्।
3. व्यवहारः।
4. प्रश्नमञ्चः।
5. नियमितता।
6. अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्यं च।

**स्वाध्यायसामग्री** (Reading Material)


1. शिशुपालवधमहाकाव्यम्, महाकविमाघः (सर्गः-2) मल्लिनाथ, श्रीपण्डितहरगोविन्दशास्त्री, चौखम्बा विद्याभवन, वाराणसी, 2015
2. संस्कृत साहित्य का इतिहास, उमाशंकर शर्मा ऋषि, चौखम्भा भारती अकादमी, वाराणसी221001-
3. संस्कृत साहित्य का इतिहास, आचार्य बलदेव उपाध्याय, शारदा निकेतन वाराणसी, 2001
4. संस्कृत साहित्य का इतिहास, कपिलदेव द्विवेदी, विश्वविद्यालय-प्रकाशन,वाराणसी।




YsRawen

## सञ्ज्ञापरिभाषाच्सन्धिप्रकृतिभावा:

**सत्रार्द्धः** = 1 **श्रेयोऽङ्कः** = 4

### पाठ्यपरिचयः –

पाठ्येऽस्मिन् आदौ माहेश्वरसूत्राणि दत्तानि सन्ति। माहेश्वरसूत्रैः प्रत्याहारनिर्माणप्रक्रिया अपि अत्र प्रतिपादिताः सन्ति। नैकानि महत्त्वपूर्णानि संज्ञापरिभाषासूत्राण्यपि अत्र दत्तानि सन्ति। यण्-अयादि-गुण-वृद्धि-पररूप-पूर्वरूपादिसन्धयोऽत्र वर्तन्ते। अन्ते प्रकृतिभावसन्धिरपि अत्र दत्तोऽस्ति।

### अधिगमपरिणामाः –

छात्राध्यापका अमुं पाठ्यविषयमधीत्य-

- माहेश्वरसूत्रैः प्रत्याहारनिर्माणे समर्था भविष्यन्ति।
- महत्त्वपूर्णानि संज्ञापरिभाषासूत्राणि विज्ञाय तेषां सन्धौ उपयोगं करिष्यन्ति।
- यण्-अयादि-गुण-वृद्धि-पररूप-पूर्वरूपादि-अच्सन्धिकरणे समर्था भविष्यन्ति।
- प्रकृतिभावसन्धिकरणे समर्था भविष्यन्ति।

### पाठ्यांश: –

1.वैयाकरणसिद्धान्तकौमुद्या आदितो 'दीर्घं च' इति सूत्रान्तो भागः।

- आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते - अष्टाध्यायीधारणा आदित 'एङ् प्राचां देशे' सूत्रान्तो भागः।

2. 'इको गुणवृद्धी' इत्यतः 'अकृतव्यूहाः पाणिनीयाः' इत्यन्तो भागः।

- आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते - अष्टाध्यायीधारणा -'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इत्यतः 'ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्री' सूत्रान्तो भागः ।

3. 'इको यणचि' इत्यतः 'इन्द्रे च' इति सूत्रान्तो भागः ।

- आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते - अष्टाध्यायीधारणा -'भूवादयो धातवः' इत्यतः 'सम्प्रतिभ्यामनाध्याने' इति सूत्रान्तो भागः।

4. 'प्लुतप्रगृह्या अचि नित्यम्' इत्यतः 'अणोऽप्रगृह्यस्यानुनासिकः' इति सूत्रान्तो भागः ।

- आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते -



YsRamu

अष्टाध्यायीधारणा -'भासनोपसम्भाषाज्ञानयत्न॰' इत्यतः 'लुटि च क्लृपः' इति सूत्रान्तो भागः।

**प्रायोगिकम्**

- अध्यापकैः यानि उदाहरणानि पाठितानि, तेषाम्, तत्सम्बद्ध-अन्येषां वा उदाहरणानां विवरणं कुर्युः।
- सूत्रस्थपदानां परिचयं दद्युः।
- प्रदत्तविषयानुसारेण लेखनम्।
- प्रदत्तविषयानुसारेण भाषणम्।
- गणशः छात्रान् प्रकल्प्य (क्रीडामाध्यमेन) मञ्जूषायां स्थापितानि पदानि परिचाययत।
- सूत्रान्त्याक्षरी भवेत्।
- व्याकरणप्रश्नमञ्चो भवेत्।
- पाठ्यांशस्य पारायणं भवेत्।
- अधीतशब्दैः वाक्यप्रयोगं कुरुत।
- छात्रैः अधीतग्रन्थस्य गणशः सामूहिकी चर्चा क्रियेत।

**विशेषः** - प्रतिमासमेकैकं प्रायोगिकं करणीयम्।

आहत्य उपर्युक्तेषु चत्वारि प्रायोगिकानि करणीयानि।

**प्रवचनप्रक्रिया**

- आगमनविधिः
- निगमनविधिः
- व्याख्यानविधिः
- फलकविधिः
- दृष्टान्तविधिः
- प्रतिदृष्टान्तविधिः
- प्रश्नोत्तरविधिः
- ई-कन्टेन्ट (P.P.T.) विडियोमाध्यमेन

**आकलनप्रक्रिया**

आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

**स्वाध्यायसामग्री** (Suggestive Reading Materials) :-

**वैयाकरणसिद्धान्तकौमुदी (महामहोपाध्यायगिरिधरशर्मणा महामहोपाध्यायपरमेश्वरानन्दशर्मणा च संशोध्य सम्पादिता)** :– अथ च गोपालदत्तपाण्डेयसम्पादिता।

1. तत्त्वबोधिनीव्याख्या
2. बालमनोरमाव्याख्या
3. लक्ष्मीव्याख्या
4. दीपिकाव्याख्या
5. चन्द्रकलाव्याख्या
6. दीक्षितपुष्पाकृत- नव्यसिद्धान्तकौमुदी
7. श्रीधरीव्याख्या

**प्रकाशकः:-**

1. मोतीलालबनारसीदासः
2. चौखम्बा सुरभारती

## 3.1.2

# विभक्त्यर्थविचारः

**सत्रार्द्धः** = 1 **श्रेयोऽङ्कः** = 4

### पाठ्यपरिचयः –

पाठ्येऽस्मिन् षण्णां कारकाणां लक्षणानि दत्तानि सन्ति। प्रथमादिविभक्तयः कुत्र भवन्तीत्यपि प्रतिपादितमस्ति। कारकविभक्तेः स्वरूपम्, उपपदविभक्तेश्च स्वरूपं दत्तमस्ति। प्रातिपदिकार्थस्वरूपमपि दत्तमस्ति। पाठ्येऽस्मिन् कारकप्रकरणस्थानां पाणिनीयसूत्राणां विशिष्य अध्ययनं व्याख्यानं च वर्तते।

### अधिगमपरिणामाः –

छात्राध्यापका अमुं पाठ्यविषयमधीत्य -

- कारकप्रकरणस्थसूत्राणां ज्ञानं प्राप्य उदाहरणानि च विज्ञाय संस्कृतभाषया प्रयोगं कर्तुं समर्था भविष्यन्ति।
- प्रथमाद्वितीयाविभक्तियुक्तपदानि विज्ञाय संस्कृतभाषया प्रयोगं कर्तुं समर्था भविष्यन्ति।
- तृतीयाचतुर्थीविभक्तियुक्तपदानि विज्ञाय संस्कृतभाषया प्रयोगं कर्तुं समर्था भविष्यन्ति।
- पञ्चमीषष्ठीविभक्तियुक्तपदानि विज्ञाय संस्कृतभाषया प्रयोगं कर्तुं समर्था भविष्यन्ति।
- सप्तमीविभक्तियुक्तपदानि विज्ञाय संस्कृतभाषया प्रयोगं कर्तुं समर्था भविष्यन्ति।

### पाठयांशः –

1. **प्रथमाद्वितीयाविभक्त्यर्थः**

- आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते - अष्टाध्यायीधारणा -'आकडारादेका संज्ञा' इत्यतः 'तत्प्रयोजको हेतुश्च' इत्यन्तो भागः।

2. **तृतीया-चतुर्थीविभक्त्यर्थः**

- आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते - अष्टाध्यायीधारणा -'प्राग्रीश्वरान्निपाताः' इत्यतः 'विरामोऽवसानम्' इत्यन्तो भागः।

1. **पञ्चमीषष्ठीविभक्त्यर्थः**

- आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते - अष्टाध्यायीधारणा -'समर्थः पदविधिः' इत्यतः 'मयूरव्यंसकादयश्च'



YsRam

इत्यन्तो भागः।

2. **सप्तमीविभक्त्यर्थः**

- आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते - अष्टाध्यायीधारणा -'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे' इत्यतः 'कडाराः कर्मधारये' इत्यन्तो भागः।

**प्रायोगिकम्**

- ➢ प्रदत्तविषयानुसारेण लेखनम्।
- ➢ प्रदत्तविषयानुसारेण भाषणम्।
- ➢ अध्यापकैः यानि उदाहरणानि पाठितानि, तेषाम्, तत्सम्बद्ध-अन्येषां वा उदाहरणानां विवरणं कुर्युः।
- ➢ सूत्रस्थपदानां परिचयं दद्युः।
- ➢ विभक्तियुक्तपदैः क्रीडामाध्यमेन वाक्यप्रयोगः।
- ➢ सूत्रान्त्याक्षरी भवेत्।
- ➢ व्याकरणप्रश्नमञ्चो भवेत्।
- ➢ पाठ्यांशस्य पारायणं भवेत्।
- ➢ अधीतशब्दैः वाक्यप्रयोगं कुरुत।
- ➢ छात्रैः अधीतग्रन्थस्य गणशः सामूहिकी चर्चा क्रियेत।

**विशेषः** - प्रतिमासमेकैकं प्रायोगिकं करणीयम्।
आहत्य उपर्युक्तेषु चत्वारि प्रायोगिकानि करणीयानि।

**प्रवचनप्रक्रिया**

- आगमनविधिः
- निगमनविधिः
- व्याख्यानविधिः
- फलकविधिः
- दृष्टान्तविधिः
- प्रतिदृष्टान्तविधिः
- प्रश्नोत्तरविधिः
- ई-कन्टेन्ट (P.P.T.) विडियोमाध्यमेन



YS Rama

**आकलनप्रक्रिया**

आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

**स्वाध्यायसामग्री** (Suggestive Reading Materials) :-

**वैयाकरणसिद्धान्तकौमुदी (महामहोपाध्यायगिरिधरशर्मणा महामहोपाध्यायपरमेश्वरानन्दशर्मणा च संशोध्य सम्पादिता)** अथ च गोपालदत्तपाण्डेयसम्पादिता।

1. तत्त्वबोधिनीव्याख्या
2. बालमनोरमाव्याख्या
3. लक्ष्मीव्याख्या
4. दीपिकाव्याख्या
5. चन्द्रकलाव्याख्या
6. श्रीधरीव्याख्या

**प्रकाशकः** –

1. मोतीलालबनारसीदास
2. चौखम्बा सुरभारती

## दर्शनम्

**सत्रार्द्धः** – 1 **श्रेयोऽङ्कः**:- 4

3.1.2 **शास्त्रीयविषयाः**

**पाठ्यपरिचयः** – भारतीयदर्शनस्य परिचयार्थम् इदं पाठ्यं निर्धारितमस्ति । भारतीयदर्शनस्य आरम्भः कदा जातः? भारतीयदर्शनस्य प्रयोजनं किम्? भारतीयदर्शने कति प्रस्थानानि सन्ति? तेषां प्रस्थानानां के महत्त्वपूर्णाः सिद्धान्ताः सन्ति? एतेषां विविधदार्शनिकप्रस्थानानां कीदृशी आचार्यपरम्परा ग्रन्थपरम्परा वा विद्यते? विविधैः आचार्यैः प्रतिपादितेषु सिद्धान्तेषु कथं कालक्रमेण परिष्काराः सञ्जाताः? इत्येतासां जिज्ञासानां समाधानम् एतस्य पाठ्यविषयस्य अध्ययनेन सम्भविष्यति । वैदिककालादारभ्य अद्यावधि भारतीयदर्शनस्य ज्ञानपरम्परा निरन्तरं परिवर्धमाना विद्यते । एषः पाठ्यविषयः दर्शनस्य ज्ञानपरम्परायाः विकासक्रमं वैशिष्ट्यं च बोधयति ।

**अधिगमपरिणामः** – एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः

- भारतीयदर्शनस्य स्वरूपं प्रयोजनं प्रवृत्तिं च विज्ञापयितुं समर्थाः भविष्यन्ति।
- न्याय-वैशेषिकशास्त्रस्य तर्कप्रणालीं बोधयितुं शक्ष्यन्ति ।
- साङ्ख्य-योगयोः समानतन्त्रतां विज्ञाय साङ्ख्य-योगसिद्धान्तानां प्रवचनकौशलं प्राप्स्यन्ति ।
- मीमांसाशास्त्रदृष्ट्या वेदवाक्यार्थप्रक्रियां प्रबोधयितुं योग्याः भविष्यन्ति ।
- वेदान्तशास्त्रस्य सिद्धान्तान् प्रस्थानभेदांश्च पाठयितुं प्रभविष्यन्ति ।

**पाठ्यांशः** –

| **पाठ्यांशः** | **विवरणम्** |
|---|---|
| १. **भारतीयदर्शनपरिचयः**<br>(चार्वाक-जैन-बौद्ध-पाश्चात्यदर्शनानां परिचयः) | (क) भारतीयदर्शनम्, दर्शनशब्दस्य व्युत्पत्तिः, दर्शनशास्त्रस्योद्गमः विकासः, भारतीयदर्शनस्य प्रवृत्तयः प्रयोजनं च । उपनिषत्सु वर्णिताः प्रमुखाः दार्शनिकविचाराः (आत्मा, ब्रह्म, जगत्, पुनर्जन्म, उपासना, कर्मवादः, मोक्षः) विविधदर्शनानां बीजसिद्धान्ताः । दर्शनशास्त्रस्य प्रस्थानानि, भारतीयदर्शनस्य विविधप्रस्थानानां |

परिचयः, आस्तिकदर्शनानां वैशिष्ट्यम्।

(ख) चार्वाकदर्शनस्य परिचयः वैशिष्ट्यं च ।

(ग) जैनदर्शनस्य परिचयः वैशिष्ट्यं च ।

(घ) बौद्धदर्शनस्य परिचयः वैशिष्ट्यं च ।

(ङ) पाश्चात्यदर्शनस्य परिचयः वैशिष्ट्यं च ।

| | |
|---|---|
| २. **न्यायवैशेषिकदर्शनपरिचयः** | न्यायदर्शनस्य परिचयः, न्यायदर्शनस्य आचार्यपरम्परा, न्यायदर्शनस्य प्रमाणमीमांसा न्यायदर्शनस्य प्रमुखाः सिद्धान्ताः।<br><br>वैशेषिकदर्शनस्य परिचयः, वैशेषिकदर्शनस्य आचार्यपरम्परा, वैशेषिकदर्शनस्य प्रमुखाः सिद्धान्ताः, न्यायवैशेषिकदर्शनयोः समानतन्त्रता । |
| ३. **साङ्ख्ययोगदर्शनपरिचयः** | साङ्ख्यदर्शनम् – साङ्ख्यशब्दस्य व्युत्पत्तिः, साङ्ख्यशास्त्रस्योद्गमः विकासश्च । साङ्ख्यशास्त्रस्य प्रयोजनम् । साङ्ख्यदर्शनस्य आचार्यपरम्परा । साङ्ख्यदर्शनस्य प्रमुखाः सिद्धान्ताः ।<br><br>योगदर्शनस्य परिचयः, योगशब्दस्य व्युत्पत्तिः योगदर्शनस्य आचार्यपरम्परा । समाधियोगः, साधनयोगः, योगदर्शनस्य प्रमुखाः सिद्धान्ताः, साङ्ख्ययोगदर्शनयोः समानतन्त्रता । |
| ४. **मीमांसा-वेदान्तपरिचयः** | मीमांसादर्शनम् – मीमांसाशब्दस्य व्युत्पत्तिः, मीमांसाशास्त्रस्योद्गमः विकासः प्रयोजनं च । मीमांसाशास्त्रस्य प्रस्थानानि । मीमांसादर्शनस्य आचार्यपरम्परा ग्रन्थपरम्परा च । मीमांसादर्शनस्य प्रमुखाः सिद्धान्ताः ।<br><br>वेदान्तदर्शनम् - वेदान्तशब्दस्य व्युत्पत्तिः, |



YSRamu

वेदान्तशास्त्रस्योद्गमः विकासः प्रयोजनं च । वेदान्तदर्शनस्य प्रस्थानानि । वेदान्तदर्शनस्य आचार्यपरम्परा ग्रन्थपरम्परा च । वेदान्तदर्शनस्य प्रमुखाः सिद्धान्ताः ।

**प्रायोगिकम्** – अस्मिन् पाठ्ये छात्राध्यापकैः करणीयाः प्रयोगाः -

- भारतीयदर्शनस्य कस्यापि एकस्य आचार्यस्य (प्राध्यापकेन सूचितस्य आचार्यविशेषस्य) जीवनं कर्तृत्वं च सरलभाषया प्रभाषणीयम् ।
- भारतीयदर्शनस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः, लेखनं भाषणं च ।
- पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम् ।
- आचार्य-ग्रन्थ-नामस्मरणक्रीडा
- पुस्तकालय-परियोजना – कमप्येकं दार्शनिकसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च ।
- प्रस्थानविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना ।

**प्रवचनप्रक्रिया** –

अस्यामन्वितौ कलायाः विविधोदाहरणानाम् अनुप्रयोगेण छात्राः कलायाः सौन्दर्यशास्त्रस्य च सामान्यविचारेषु मानवजीवने सौन्दर्यस्य विविधायामानां प्रकटनविषये च परिचर्चा भविष्यति। छात्राः दैनन्दिनजीवनस्य सौन्दर्यसम्बद्धविविधपक्षाणामभिज्ञाने सौन्दर्यसम्बद्धनिर्णयविकासे च संलग्नाः भविष्यन्ति अपि च शिक्षायां कलायाः भूमिकाविषये सुपरिचिताः भविष्यन्ति । अस्याङ्गतया शिक्षायां कलायाः पक्षत्रयस्यापि परिचयः कारयिष्यते – कलायाः मूल्यं शिक्षायाञ्च उपकरणत्वेन एतदनुप्रयोगः, कलाकार्याणां नैतिकायामाः, प्रसिद्धकलायाः उच्चकलायाश्च मूल्ये विवादास्पदभेदश्चेति ।

## द्वितीयपाठ्यांशः

## काष्ठपुत्तलिकानाम् अभिकल्पनम् (षट् सत्राणि)

अस्यामन्वितौ छात्राः काष्ठपुत्तिलकाकलाविषये एतदीयेतिहासविषये विशिष्य काष्ठपुत्तलिकाः कथं कार्याणि कुर्वन्ति चेति विषये ज्ञास्यन्ति। अस्यामन्वितौ काष्ठपुत्तलिकायाः प्रारूपनिर्माणार्थम् अपेक्षितकल्पनाविषये, काष्ठपुत्तलिकायाः उपयोगविषये काष्ठपुत्तलिकानिर्माणे प्रयुज्यमानप्रविधीनाञ्च विषये परिचर्चा भविष्यति। एतत् सर्वं छात्राः काष्ठपुत्तलिकायाः प्रारूपनिर्माणं विधाय अध्येष्यन्ते । छात्राः प्रथमम् अङ्गुलीकाष्ठपुत्तलिकानिर्माणं कृत्वा तदनन्तरं कर्गदमाध्यमेन मीन-पक्षि-मूषकादीनां लघ्वाकृतीनां निर्माणार्थम् अग्रेसराः भविष्यन्ति । ततश्च ते विविधप्रकारकमुखावरणानां निर्माणं करिष्यन्ति। अन्ते च ते पुरातनसमाचारपत्रैः

वर्णमयपत्रकैश्च पुत्तलिकायाः निर्माणं विधाय क्रीडयितुं प्रदर्शयितुञ्च सज्जीकुर्वन्ति । अपि च ते वेशभूषासम्बद्धानि अन्यापेक्षितवस्तूनि च सज्जीकुर्वन्ति ।

**तृतीयपाठ्यांशः**

**पुत्तलिकानां प्रदर्शनम् (सत्रचतुष्टयम्)**

अस्यामन्वितौ छात्राः काष्ठपुत्तलिकाकलां प्रदर्शयितुम् उत्तमाकर्षककथानकं निर्मातुञ्च आवश्यकसम्प्रेषणकौशलानां विषये ज्ञात्वा स्वीयनिर्मितानां काष्ठपुत्तलिकानां प्रदर्शनं करिष्यन्ति । पुत्तलिकायाः प्रदर्शनं शैक्षिकसन्दर्भे केनचित् क्रियाकलापेन सह सम्बद्धं स्यात् । सर्वेऽपि छात्राः स्वीयनिर्मितपुत्तलिकानामेव प्रदर्शनं करिष्यन्ति। प्रारम्भे प्रत्येकमपि छात्रः स्वनिर्मितपुत्तलिकानां प्रदर्शनं करिष्यति तदनन्तरं युगलसमूहे, ततः स्वीयपुत्तलिकाभिः सह लघुनाटकं सज्जीकृत्य लघुसमूहे प्रदर्शनं करिष्यन्ति। अनेन तेषामधिगमः संघटितः प्रतिबिम्बितश्च भवति। काष्ठपुत्तलिकानिर्माणस्य विविधपक्षाणां लघुबालानां कक्षाकक्षे कथं समावेशः कर्तुं शक्यते इति विषयेऽपि परिचर्चा विधास्यते। काष्ठपुत्तलिकानिर्माणकाले वैयक्तिकान् सामूहिकांश्च अभ्यासान् आत्मसात्कर्तुं कक्षासन्दर्भे च प्रयोक्तुं चर्चा करिष्यते ।

**5.3.3 शिक्षणशास्त्रम् -** शिक्षणशास्त्रं मूलतः व्यावहारिकं प्रशिक्षणं वर्तते, अत्र अनुभवात्मकाधिगमाय अधिकं बलं दीयते। ते कार्याणि कृत्वा कलाविषये शिक्षया सह तत्सम्बन्धविषये च अधिगच्छन्ति । इयं प्रक्रिया कलायाः विविधरूपैः ललितकला, विविधवर्णयुक्तक्रीडा, वेषभूषानिर्माणकला, सौन्दर्यप्रसाधनकला, पटकथालेखनं सङ्गीतञ्चेत्यादिभिः परिचाययति ।

### 5.3.4 आकलनप्रक्रिया

| सप्ताहानुसारं सत्राणां विवरणम् | | | |
|---|---|---|---|
| **क्र.सं.** | **शीर्षकम्** | **सत्रप्रवाहः** | **टिप्पणी** |
| 1. | कला सौन्दर्यञ्च, दैनन्दिनजीवने कला | अनुभवानुसारम् | |
| 2. | कलायाः महत्त्वम्, कलायाः समालोचना | परिचर्चा | |
| 3. | कला कलायाः कृते, समाजिकोत्तरदायित्वेन सह कला, सामाजिकपरिवर्तनाय कला | वादविवादः | |
| 4. | काष्ठपुत्तलिकाजगत्, काष्ठपुत्तलिकायाः विभिन्नरूपाणि | प्रस्तुतीकरणम् | |
| 5. | काष्ठपुत्तलिकायाः इतिहासः | व्याख्यानम् | |
| 6. | अङ्गुलीपुत्तलिकायाः निर्माणम् | क्रियात्मकम् | |
| 7. | मुखावरणानां निर्माणम् | क्रियात्मकम् | |

| | | | |
|---|---|---|---|
| 8. | पुत्तलिकानां निर्माणम् | क्रियात्मकम् | |
| 9. | वैयक्तिकं प्रदर्शनम् | अभ्यास: | |
| 10. | युगलप्रदर्शनम् | अभ्यास: | |
| 11. | समूहप्रदर्शनम् – 3, 4, 5 | अभ्यास: | |
| 12. | प्रदत्तकार्यम् | लिखितम् | |

5.3.5 **स्वाध्यायसामग्री**

शिक्षार्थिनाम् अधिगमसामग्रीणाञ्च आवश्यकतानुसारं शिक्षकाः पुस्तकानि/ पठनसामग्रीञ्च सूचयितुमर्हन्ति ।

## 5.4 भारतावबोधः (भारतीयज्ञानप्रणाली आचाराश्च)

**सत्रार्द्धः - प्रथमः** **श्रेयोऽङ्काः - 2**

### 5.4.1 पाठ्यपरिचयः

प्राविधिकनवाचारात् पर्यावरणपरिवर्तनवशात् च गतिशीलेऽस्मिन् विश्वे युवचेतसां निर्माणाय काचिद् अन्तर्दृष्टिः आवश्यकी। अस्मिन् परिवर्तनकाले अन्तर्दृष्ट्या मनुष्यः न केवलं समाजशास्त्रीयाम् आत्मीयतां प्राप्नोति, अपितु आध्यात्मिकबौद्धिकमूलानि अपि अवाप्नोति। पाठ्यक्रमोऽयम् अर्थव्यवस्था-समाज-राजनीति-विधिशास्त्र-पर्यावरण-संस्कृति-नैतिकता-विज्ञान-दर्शनादिषु प्रमुखविषयेषु भारतीयन्यासस्य ज्ञानपरम्परायाश्च दृष्टिं प्रयच्छति। पाठ्यक्रमोऽयं भारतीयज्ञानपरम्पराणाम् अनुप्रयोगे विशिष्टं बलं प्रयच्छति, अपि च छात्रेभ्यः न केवलं भारतीयन्यासस्य ज्ञानपरम्परायाश्च ज्ञानाय अनुमोदनाय अपि तु बहुविषयकदृष्ट्या स्वातन्त्र्येण मूल्याङ्कनं कर्तुं तेषां साहाय्यं विदधाति। एतन्मूल्याङ्कनं सङ्क्रमणीयानि एकविंशशतकसम्बद्धानि कौशलानि प्राप्तुं मूल्यवतः पाठान् प्रस्तोष्यति। एतत्पाठ्यक्रमाय पूर्वज्ञानस्य पूर्वावबोधस्य च अपेक्षा न वर्तते । वर्षद्वयात्मकोऽयं पाठ्यक्रमः मूलभूतं ज्ञानं संस्थापयिष्यति तदाधारेण नवनिर्माणञ्च करिष्यति। पाठ्यक्रमोऽयं भारतीयपरम्परायाः सामान्यावबोधेन सह पूर्वतनवर्षेषु परम्परेयं कथं विकसिता चेत्यवबोधमपि छात्राणां विकासयिष्यति । पाठ्यक्रमोऽयं बहुविषयकदृष्ट्या भारतीयज्ञानस्य निर्माणस्य विकासस्य च प्रक्रियाणां घटनानां रूपरेखानिर्माणे व्याख्यासम्पादने, भारतस्य विविधपरम्पराणां मूल्याङ्कनाय तासाम् उपलब्धिपरिसीम्नोः भेदप्रकटने, कक्षायाः सन्दर्भे स्वीयच्छात्राणां भारतीयविचारेषु निहितायाः नैतिकताधारितशिक्षायाः विकासे स्पष्टीकरणे च सक्षमच्छात्राध्यापकानां निर्माणार्थं विरचितः।

### 5.4.2 अधिगमपरिणामाः

एतत्पाठ्यक्रमसमाप्तेः परं छात्राः -

- भारतस्य ज्ञानपरम्पराणां विशालनिधिम् अभिज्ञाय तद्विषयकगौरवभावप्रदर्शने समर्थाः भविष्यन्ति।
- स्वार्जितानुसन्धानात्मककौशलम् आलोचनात्मकचिन्तनकौशलञ्च बहुविषयकविषयेषु अनुप्रयोक्तुं समर्थाः भविष्यन्ति।
- विभिन्नभारतीयपरम्परापृष्ठभूमेः स्वीयच्छात्रान् सरलमाध्यमेन स्वकीयज्ञानं सारांशीकृत्य बोधयितुं समर्थाः भविष्यन्ति।

**पाठ्यांशः प्रथमः**

**भारतीयज्ञानपरिचयः**

(A) परिभाषा अवसरः प्रासङ्गिकता च।

(B) भारतीयप्राचीनज्ञानपरम्परायाः संस्कृतेश्च पुनरवलोकनस्य आवश्यकता।

**पाठ्यांशः द्वितीयः**

**संस्कृतिः – कला साहित्यं च**

(A) ललितकलाः (पारम्परिककलारूपाणि, समकालिककलाः, कला आध्यात्मिकता च, कला निजप्रत्ययः च, कला वैश्वीकरणं च।

(B) प्रदर्शनकलाः (भारतीयनृत्यप्रणाली, पारम्परिकभारतीयसङ्गीतस्य अंशाः, दृश्यकलाः, लोककलाः चेत्यादयः)

(C) साहित्यम् (संस्कृतसाहित्यम्, धार्मिकसाहित्यम्, भारतीयकाव्यम्, लोकसाहित्यम्, भारतीयकथासाहित्यम्, सङ्गमसाहित्यम्, कन्नड़मलयालमसाहित्यम्, बङ्गसाहित्यम् चेत्यादीनि)

**पाठ्यांशः तृतीयः**

**राजनीतिः विधिशास्त्रं च**

(A) राजत्वं सर्वकारप्रकाराश्च (कुलीनतन्त्रं, गणतन्त्रं), स्थानीयप्रशासनम् (ग्रामप्रशासनम्)

(B) विधिशास्त्रस्य आधारः – धर्मः तत्स्रोतांसि च , आपराधिकन्यायः – आरक्षकाः, कारागाराः दण्डाश्च, चाणक्यनीतितः शिक्षाः, आधुनिकभारताय शिक्षा - परम्परासञ्चालितां समतामूलां न्यायपूर्णां च राजव्यवस्थां विधिशास्त्रव्यवस्थां च प्रति।

**पाठ्यांशः चतुर्थः**

**अर्थव्यवस्था**

(A) पाषाणयुगाद् गुप्तकालं यावद् भारतीयार्थव्यवस्थायाः अवलोकनम् – नगरीकरणस्य नवसंस्कृतिः (जातिभिः, व्यापारसंघैः अन्यार्थिकसंस्थानैः सहितम्, हड़प्पासभ्यतायाः अर्थव्यवस्था, कृषेः विकासः नवव्यवसायानां प्रसारः, लेखनस्य विकासः)

(B) आन्तरिकाः बाह्याश्च व्यापाराः वाणिज्यं च, व्यापारमार्गेण सह इण्डोरोमनसम्पर्काः, दक्षिणभारतीयसामुद्रिकव्यापाराः, मन्दिरार्थव्यवस्था च ।

(C) भूमिस्वामित्वम् – भूम्यनुदानानि सम्पत्त्यधिकाराश्च, भूमिराजस्वप्रणालयः।

(D) अर्थशास्त्रावबोधनम् – विचाराः आलोचनाश्च, आधुनिकभारतीयार्थव्यवस्थायां प्राचीनभारतीयार्थिकविचाराणां प्रासङ्गिकतायाः विन्यासः।

**पाठ्यांशः पञ्चमः**

**पर्यावरणं स्वास्थ्यञ्च**

(A) समाजपर्यावरणयोः मध्ये सन्तुलनस्य अवगमनम्। प्राकृतिकसंसाधनानां वनभूमिजलप्राणिनां विषये समाजस्य धारणा।

(B) सततवास्तुकला नगरीयनियोजनं च – अद्यतनपर्यावरणीयसमस्यानां समाधानम् (स्वदेशीयज्ञानात् समाजनीतप्रयासेभ्यः सर्वोत्तमकार्याणि।)

(C) भारतीयस्वास्थ्यपरम्परा – आयुर्वेदः, सिद्धः, अष्टवैद्यः, यूनानी, अन्यविचारधाराश्च, सुश्रुतचरकसंहिताभ्यां पाठाः।

(D) प्राचीने भारते मानसिकं स्वास्थ्यम् – मानसिककल्याणस्य समयपरीक्षितावधारणाः (मनः, ध्यानं, मनश्शरीरसम्बन्धः, आयुर्वेदः, योगदर्शनम् आत्मा चेत्यादीनाम् अवधारणाः)

**5.4.3 प्रायोगिकम्**

पाठ्यक्रमसम्प्रेषणमाध्यमे व्याख्यानानि अनुशिक्षणं प्रायोगिकानुभवाश्च समाविष्टाः भविष्यन्ति।

प्रायोगिकानुभवेषु दिवसभ्रमणस्य आयोजनम्। यत् छात्राध्यापकेभ्यः दृश्यप्रदर्शनकलासम्बन्धितकार्यक्रमान् द्रष्टुं साहाय्यं विदधाति। नगरे विद्यमानानां प्राचीनवास्तुकलासम्बद्धानां तत्त्वानां चित्र-चलच्चित्रमाध्यमेन अभिज्ञाने अभिलेखीकरणे च छात्राध्यापकानां सामर्थ्यविकासपराणां



YsRamu

गतिविधीनाम् आयोजनम्। राजनीतिविधिशास्त्रार्थव्यवस्थादिविषयाधारितानां वैयक्तिकसामूहिकप्रस्तुतीनाम् आयोजनम्।

### 5.4.4 प्रवचनप्रक्रिया

संस्थाने स्थानीयपरम्परायाः व्यवस्थादीनाञ्च विकासविषये संस्कृतेः (वेष-भोजनादिपरम्पराणाम्) उत्सवाय व्याख्यान-अनुशिक्षण-संवादादिमाध्यमेन परिवारजन-वृद्ध-प्रतिवेशिभिः अन्यसामाजिकजनैश्च सह भारतीयज्ञानदिवसस्य आयोजनम् । व्याख्यानेषु शिक्षार्थि-संचालितानि भागग्राहिसत्राणि, विशेषज्ञानाम् अभ्यासकर्तॄणाञ्च (समकालिककविभिः भारतीयसाहित्यलेखकैश्च सह ललितकलाप्रदर्शनकलाभ्यासकर्तॄणाम्) अतिथिव्याख्यानानि समाविष्टानि भविष्यन्ति ।

- अनुशिक्षणेषु वृत्तचित्राणां चलचित्राणां च प्रदर्शनम्, ततश्च संवादः, केन्द्रितसमूहसंवादरूपेण (FGDS) शिक्षार्थिसंचालिताः चर्चाः, सुकरातीयचर्चाः चेत्यादयः । भारतीयवादपरम्परायाः बोधाय संवादानां वादानां वा आयोजनम्, शिक्षणस्य प्राचीनपद्धतीनां वर्तमाने प्रासङ्गिकतोपपत्ति-विचारः, दैनिकजीवने नैतिकदुविधाः अवगन्तुं निराकर्तुं च प्राचीननीतीनां मूल्यानां महत्त्वबोधाय सहकारिण्यः चर्चाश्च समाविष्टाः भविष्यन्ति ।

### 5.4.5 आकलनप्रक्रिया

अधिगमाकलनस्य उपागमे अधोलिखिता बिन्दवः सम्मिलिताः भविष्यन्तिः –

उदाहरणार्थम् -

- नियतमूल्याङ्कनेन प्रतिकार्यप्रतिपुष्ट्या सहितं, नैकविधदृष्ट्या चितेषु विषयेषु छात्राध्यापकानां जिज्ञासायाः रुचेश्च समर्थनम्, येन ते बहुशास्त्रीयदृष्ट्या भारतीयज्ञानस्य निर्माणस्य विकासस्य च प्रक्रियाणां घटनानां रूपरेखां व्याख्यां च विधातुं समर्थाः स्युः।
- विभिन्नपरम्पराणां निर्माणे विकासे च प्रक्रियाणां घटनानां च समालोचनात्मकानुशीलनं स्वतन्त्रविचारांश्च प्रतिपादयितुं छात्राध्यापकानां सामर्थ्यस्य विकासः, येन तेभ्यः भारतस्य विभिन्नपरम्पराणाम् उपलब्धिषु सीमसु च भेदं कर्तुं मूल्याङ्कने सहायता स्यात्।
- प्रत्यक्षपरोक्षानुभवानां प्रयोगाः, यद्द्वारा छात्राध्यापकाः कक्षायां छात्रेषु भारतीयविचारेषु निहितां नैतिकाधारितां शिक्षां विकासयितुं स्पष्टीकर्तुं च क्षमाः स्युः।

### 5.4.6 स्वाध्यायसामग्री

शिक्षार्थिनाम् अधिगमसामग्रीणाञ्च आवश्यकतानुसारं शिक्षकाः पुस्तकानि/ पठनसामग्रीञ्च सूचयितुमर्हन्ति ।

# द्वितीयः सत्रार्द्धः (II$^{nd}$ Semester)

| क्रं.सं. | पाठ्यचर्यात्मकघटकाः | पाठ्यविषयाः | प्रतिसत्रार्धं श्रेयोऽङ्काः द्वितीयः सत्रार्द्धः | पाठ्यविषयशः श्रेयोऽङ्काः |
|---|---|---|---|---|
| 3.1 | * (किमपि एकं शास्त्रं चिनोतु)<br>**शास्त्रीयविषयाः/**<br>**अन्तःशास्त्रीयविषयाः**<br>**(विद्यालयपाठ्यचर्यातः)** | **साहित्यम् (प्रथमपत्र) -**<br>मेघदूते वर्णितानि भौगोलिकक्षेत्राणि<br>(मेघदूतम्-पूर्वमेघः)<br>**साहित्यम् (द्वितीयपत्र) -**<br>प्रमुखाणि छन्दांसि कविशिक्षा च<br>(छन्दोमञ्जरी काव्यमीमांसा च) | 4 + 4 | 8 |
| | | **व्याकरणम् (प्रथमपत्र) -** अजन्तशब्दरूपसिद्धयः<br>**व्याकरणम् (द्वितीयपत्र) -**<br>हल्-विसर्ग-स्वादिसन्धयः, हलन्तशब्दरूपप्रक्रिया अव्ययानि च | 4 + 4 | |
| | | **दर्शनम् (प्रथमपत्र) -** योगदर्शनम्<br>**दर्शनम् (द्वितीयपत्र) -** भारतीयन्यायशास्त्रस्य | 4 + 4 | |
| | | **ज्योतिषम् (प्रथमपत्र) -** फलितज्योतिषम्<br>**ज्योतिषम् (द्वितीयपत्र) -** वास्तुशास्त्रम् | 4 + 4 | |
| 3.2 | * (एकम् आधुनिकं विषयं चिनोतु) | **हिन्दी** - हिन्दी साहित्य एवं काव्य | 4 | 4 |
| | | **English** Literature | | |
| | | **मलयालम्** साहित्यम् | | |
| | | **इतिहासः** - भारत : सांस्कृतिक उत्थान का काल (प्रारंभिक काल से 550 ई.) | | |
| | | **राजनीतिशास्त्र-** प्रतिनिधि राजनीतिक चिंतन ( भारतीय एवं पाश्चात्य) | | |
| | | **रङ्गमञ्च** - नाट्यसंग्रहो रसा भावाश्च | | |
| 5.1 | योग्यतासंवर्धनं मूल्यसंवर्धित-पाठ्यविषयाश्च | सम्प्रेषणात्मकं आङ्गलम् | 4 | 4 |
| 5.4 | | भारतावबोधः (मान्यताः ज्ञानप्रणाली च) | 2 | 2 |
| 5.5 | | शिक्षकः समाजश्च | 2 | 2 |
| 7.2 | व्यावसायिक-क्षमतोन्नयनं सामुदायिकसेवा च | भारतीयज्ञानपरम्परामाधृत्य वैज्ञानिकपरियोजना<br>(i) स्वशास्त्रीयपरियोजना | 2 | 2 |
| | | **आहत्य श्रेयोऽङ्काः** | **22** | **22** |

## 3.1.3

**सत्रार्द्धः** -2 **श्रेयोऽङ्कः** - 4

**पाठ्यपरिचयः - मेघदूते वर्णितानि भौगोलिकक्षेत्राणि (मेघदूतम्-पूर्वमेघः)**

अत्र महाकविकालिदासेन मन्दाक्रान्ताछन्दसा रचितस्य मेघदूतस्य पूर्वभागो निर्धारितः। इह भारतवर्षस्य प्राचीनानि यानि भौगोलिकक्षेत्राणि प्रतिपादितानि, तेषां मनोहरं वर्णनमस्ति। मेघदूतस्य श्लोकानां वर्णितभौगोलिकक्षेत्राणां च अवगमो भविष्यति।

**अधिगमपरिणामः**( Learning Outcome)-

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- महाकविकालिदासं तद्रचनारीतिं च परिचेष्यन्ति।
- प्राचीनभारतीयभौगोलिकक्षेत्राणि प्रतिपादयितुं शक्ष्यन्ति।
- मन्दाक्रान्ताच्छन्दसः प्रयोगे कौशलम् प्राप्स्यन्ति।
- विरहिमनोदशाविज्ञाने समर्था भविष्यन्ति।

| **पाठ्यांशः** (Unit) | **विवरणम्** |
|---|---|
| 1. **खण्डकाव्यपरम्परा** (1) | • खण्डकाव्यस्य परिचयः<br>• मेघदूतस्य वैशिष्ट्यम्<br>• कालिदासस्य कवित्वम्<br>• यक्षस्य विप्रलम्भः |
| 2. **यक्षेण स्वदुःखस्य निवेदनम्** (1) | • वर्षभोग्यः शापः<br>• कामार्त्तस्य प्रकृतिकृपणत्वम्<br>• कुसुमसदृशं हृदयम्<br>• शिखरस्य श्यामत्वम् |
| 3. **मेघमार्गस्य दर्शनम्** (1) | • विन्ध्यपादे विशीर्णाया रेवाया दर्शनम्<br>• वेत्रवतीनदीदर्शनम् |



YsRam

- विशालापुरीदर्शनम्
- शिप्रानदीदर्शनम्
- महाकालदर्शनम्।

19 अध्वक्लान्तम् इति पद्यम् आरभ्य अप्यन्यस्मिन् जलधर इति 38 पद्यपर्यन्तम्।

4. **प्रकृतिवर्णनम्** (1)

- सान्ध्यतेजोवर्णनम्
- गम्भीरानदीवर्णनम्
- रन्तिदेवस्य कीर्तिकथा
- कैलासवर्णनम्
- मानससरोवर्णनम्

39 पादन्यासैः क्वणित इति पद्यम् आरभ्य तस्योत्सङ्गे प्रणयिन इव 67 इति पद्यपर्यन्तम्।

**प्रायोगिकम्** (Practicum)

1. श्लोकोच्चारणम्।
2. श्लोकस्मरणम्।
3. श्लोकव्याख्यालेखनम्
4. प्रदत्तश्लोकाश्रितं व्याख्यानम्
5. रत्यादिभावानाम् अनुसंधानम्।
6. वाच्यपरिवर्तनम्।
7. सुबन्ततिङन्त-समस्तादिपदानां संग्रहः।
8. प्रयुक्तालंकारसंग्रहः
9. वर्णितभौगोलिकाधारेण भारतस्वरूपस्य मानचित्रमाध्यमेन प्रदर्शनम्

**प्रवचनप्रक्रिया** (Mode of Transaction) -

श्लोकव्याख्याने खण्डान्वयः दण्डान्वयश्च विधिराश्रयाणीयः। श्लोकोच्चारणै करणीयं च। पद-पदार्थादयो वाच्याः। प्रतिश्लोकं यथासंभवं रस-भावादयः काव्यशास्त्रीया विषया बोधनीयाः।

**आकलनप्रक्रिया** (Mode of Assessment)

1. श्लोकोच्चारणशुद्धिः।
2. अभिव्यक्तिकौशलम्।
3. व्यवहारः।
4. प्रश्नमञ्चः।
5. नियमितता।
6. अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्याणि च।

**स्वाध्यायसामग्री** (Reading Material)


1. मेघदूतम्, कालिदासः, डा. दयाशङ्करशास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2017
2. संस्कृत साहित्य का समीक्षात्मक इतिहास, कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन,2007
3. संस्कृत साहित्य का इतिहास, आचार्य बलदेव उपाध्याय, शारदा निकेतन, वाराणसी, 2001
4. कालिदास का भारत, भगवत्शरण उपाध्या,मोतीलाल बनारसीदास


YsRamu

3.1.4

**सत्रार्द्धः**- 2 **श्रेयोऽङ्कः**:- 4

**पाठ्यपरिचयः** -

**प्रमुखाणि छन्दांसि कविशिक्षा च (छन्दोमञ्जरी काव्यमीमांसा च)**

इह प्रमुखाणि छन्दांसि, शास्त्राणां संग्रहः, कविशिक्षा च प्रतिपादितानि।

**अधिगमपरिणामः**( Learning Outcome)

एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः-

- छन्दःशास्त्रपरम्परायाः प्रतिपादने समर्था भविष्यन्ति।
- प्रमुखाणां छन्दसां लक्षणानि बोद्धुं प्रभविष्यन्ति।
- कवेः कर्तव्यानि बोद्धुं शक्ष्यन्ति।
- लक्ष्यग्रन्थेषु कविसमयस्य गवेषणे कौशलं प्राप्स्यन्ति।
- छन्दःप्रयोगकौशलम् अधिगमिष्यन्ति।

| **पाठ्यांशः** (Unit) | **विवरणम्** |
|---|---|
| 1. **छन्दःशास्त्रपरम्परा** (1) | • छन्दःशास्त्रस्य परिचयः<br>• गङ्गादासस्य पाण्डित्यं छन्दोमञ्जर्याः मौलिकता च<br>• वृत्तभेदाः, आर्या-मात्रावृत्तम्, गीतिः च।<br>गणवृत्तम् - अर्धसमम्, विषमं च।<br>• गुरुलघुनिर्देशः-ऽ,।, उक्थादिगणना च। |
| 2. **छन्दांसि** –(1) | • अनुष्टुप् छन्दः - श्लोकः - अष्टाक्षरावृत्तिः, विद्युन्माला।<br>• पङ्क्तिः छन्दः - मत्ता वृत्तम् - दशाक्षरावृत्तिः।<br>• त्रिष्टुप् छन्दः - इन्द्रवज्रा - एकादशाक्षरा वृत्तिः, उपेन्द्रव्रजा, उपजातिः, शालिनी, दोधकम्।<br>• जगती छन्दः - वंशस्थम् - द्वादशाक्षरा वृत्तिः, भुजङ्गप्रयातम्, तोटकम्, द्रुतविलम्बितम्। |

3. **छन्दांसि**-(1)

- अतिजगती छन्दः - प्रहर्षिणी - त्रयोदशाक्षरा वृत्तिः, मत्तमयूरम्, मञ्जुभाषिणी।
- शक्वरी छन्दः - वसन्ततिलका - चतुर्दशाक्षरा वृत्तिः।
- अतिशक्करी छन्दः - मालिनी - पञ्चदशाक्षरा वृत्तिः।
- अष्टिः छन्दः - पञ्चचामरम् - षोडशाक्षरा वृत्तिः।
- अत्यष्टिः छन्दः - सप्तदशाक्षरा वृत्तिः, शिखरिणी, मन्दाक्रान्ता, पृथ्वी।
- शार्दूलविक्रीडितम्, स्रग्धरा च।

4. **कविशिक्षा** (1)

- शास्त्रसङ्ग्रहः

  अथातः काव्यं मीमांसिष्यामहे इत्यारभ्य कविभ्यो )
  (राजशेखरः इति पर्यन्तम्
- कविचर्या राजचर्या च

  (गृहीतविद्योपविद्यः इत्यारभ्य स सुखी तत्र तत्र च इति पर्यन्तम्)

  शब्दार्थहरणोपायाः

  परप्रयुक्तयोः शब्दार्थयोः इत्यारभ्य मन्यतां स )
  (महाकविः इति पर्यन्तम्
- कविसमयः

  अशास्त्रीयमलौकिकं च परम्परायातम् इत्यारभ्य )
  (पातालीयश्च कथ्यते इति पर्यन्तम्

**प्रायोगिकम्** (Practicum)

1. प्रदत्तविषयानुसारेण भाषणम्।
2. छन्दोविशेषसंबद्धानां श्लोकानाम् उच्चारणम्।
3. प्रदत्तेन छन्दसा पद्यस्य निर्माणम्

4. पठितानां छन्दसां काव्येषु गवेषणम्
5. कविसमयसंबद्धानां श्लोकानाम् अन्वेषणम्।
6. छन्दोविशेषसंबद्धश्लोकानुसारेण वीडियोनिर्माणम्।

**प्रवचनप्रक्रिया** (Mode of Transaction) -

व्याख्यनात्मकः प्रत्यक्षात्मकश्च विधिरायश्रणीयः छन्दसाम् उच्चारणं करणीयं कारणीयं च। काव्यमीमांसायाः पङ्क्तयो विषयाश्च प्रतिपादनीयाः। विषयसंबद्धानि अन्यानि अपि उदाहरणानि देयानि।

**आकलनप्रक्रिया** (Mode of Assessment)

पठितविषयानुसारेण यथानियमम्।

1. प्रदत्तविषयानुसारेण लेखनम्
2. छन्दविशेषस्योच्चारणम्
3. प्रश्नमञ्चः
4. छन्दोविशेषसंबद्धश्लोकस्मरणम्
5. व्यवहारः
6. अधिगमसामर्थ्यम्, परियोजनाकार्यम्, प्रयोगकार्यम् च।

**स्वाध्यायसामग्री** (Reading Material)


1. श्रीगङ्गादासप्रणीता छन्दोमञ्जरी, व्याख्या. डा. ब्रह्मानन्द त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वाराणसी-२२१००१
2. हिन्दी काव्यमीमांसा सं. डा. गंगासागर राय, चौखम्बा विद्याभवन, वाराणसी-२२१००१
3. काव्यालंकारसूत्राणि, वामनः, श्रीगोपेन्द्रत्रिपुरहरभूपालः, चौखम्बासंस्कृतसुरभारती - प्रकाशनम्, वाराणसी, 2001
4. पिङ्गलस्य छन्दःशास्त्रम्, निर्णयसागर प्रेष
5. छन्दस्कलावती, डॉरामकिशोरमिश्रः ., प्रकास्वयं ., संस्कृत विभाग, महा.वि .म .मा ., खेकड़ा, । 1991
6. छन्दःसन्दोहः, (काव्यम्) दत्तदीनेशचन्द्रः, अन्तर्राष्ट्रीय ग्रन्थागार, पो. ऑ. बाक्स 149, प्राप्ति स्थान – मोतीलाल बनारसीदास, बैंग्लो रोड, जवाहर नगर, दिल्ली, जयपुर, 1968
7. छन्दोऽभिराजीयम्, (छन्दःशास्त्रम्) अभिराजराजेन्द्रमिश्रः, वैजयन्त प्रकाशन, इलाहाबाद, 1999




YSRamana

3.1.3

## अजन्तशब्दरूपसिद्धयः

**सत्रार्द्धः** = 2 **श्रेयोऽङ्कः** = 4

**पाठ्यपरिचयः –**

पाठ्येऽस्मिन् आदौ प्रातिपदिकस्य लक्षणं दत्तमस्ति। अत्र अदन्तशब्दरूपाणाम् अदन्तसर्वनामशब्दरूपाणां सिद्धिप्रक्रिया दत्ताऽस्ति। एवमेव अजन्तपुल्लिङ्गशब्दानाम्, अजन्तस्त्रीलिङ्गशब्दानाम्, अजन्तनपुंसकलिङ्गशब्दानां सिद्धिप्रक्रिया अत्र दत्ताऽस्ति।

**अधिगमपरिणामाः –**

छात्राध्यापकाः अमुं पाठ्यविषयमधीत्य -

- अदन्तशब्दरूपाणि अदन्तसर्वनामशब्दरूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।
- अजन्तपुँल्लिङ्गशब्दरूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।
- अजन्तस्त्रीलिङ्गशब्दरूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।
- अजन्तनपुंसकलिङ्गशब्दरूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।

**पाठ्यांशः** –

1. 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इत्यतः 'प्रथमचरमतयाल्पार्धकतिपय-नेमाश्च' इति सूत्रान्तो भागः।
    - आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते - अष्टाध्यायीधारणा -'अनभिहिते' इत्यतः 'चतुर्थीचाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः' इति सूत्रान्तो भागः।
2. 'जराया जरसन्यतरस्याम्' इत्यतः 'रायो हलि' इति सूत्रान्तो भागः।
    - आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते - अष्टाध्यायीधारणा -'द्विगुरेकवचनम्' इत्यतः 'वा यौ' इति सूत्रान्तो भागः।
3. 'औङ आपः' इत्यतः 'न षट्स्वस्रादिभ्यः' इति सूत्रान्तो भागः।
    - आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते -



YsRama

अष्टाध्यायीधारणा -'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' इत्यतः 'चिण्भावकर्मणोः' इति सूत्रान्तो भागः।

4. 'अतोऽम्' इत्यत 'एच इग्घ्रस्वादेशे' इति सूत्रान्तो भागः।

- आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् -अङ्कद्वयस्य कृते —
  अष्टाध्यायीधारणा - 'सार्वधातुके यक्' इत्यतः 'आशिषि च' इति सूत्रान्तो भागः।

**प्रायोगिकम्**

- शब्दरूपोच्चारणम्।
- अध्यापकैः यानि उदाहरणानि पाठितानि, तेषाम्, तत्सम्बद्ध-अन्येषां वा उदाहरणानां विवरणं कुर्युः।
- सूत्रस्थपदानां परिचयं दद्युः।
- शब्दरूपैः वाक्यनिर्माणम्।
- लिङ्गानुसारेण पदानि चिनुत।
- सूत्रान्त्याक्षरी भवेत्।
- व्याकरणप्रश्नमञ्चो भवेत्।
- पाठ्यांशस्य पारायणं भवेत्।
- अधीतशब्दैः वाक्यप्रयोगं कुरुत।
- छात्रैः अधीतग्रन्थस्य गणशः सामूहिकी चर्चा क्रियेत।
- गणशः छात्रान् प्रकल्प्य शास्त्रार्थं कारयत।

**विशेषः** - प्रतिमासमेकैकं प्रायोगिकं करणीयम्।
आहत्य उपर्युक्तेषु चत्वारि प्रायोगिकानि करणीयानि।

**प्रवचनप्रक्रिया**

- व्याख्यानविधिः
- फलकविधिः
- दृष्टान्तविधिः
- प्रतिदृष्टान्तविधिः
- प्रश्नोत्तरविधिः
- ई-कन्टेन्ट (P.P.T.) विडियोमाध्यमेन



YsRamu

**आकलनप्रक्रिया**

आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

**स्वाध्यायसामग्री** (Suggestive Reading Materials) :-

**वैयाकरणसिद्धान्तकौमुदी (महामहोपाध्यायगिरिधरशर्मणा महामहोपाध्याय-परमेश्वरानन्द-शर्मणा च संशोध्य सम्पादिता) अथ च गोपालदत्तपाण्डेयसम्पादिता।**

1. तत्त्वबोधिनीव्याख्या
2. बालमनोरमाव्याख्या
3. लक्ष्मीव्याख्या
4. दीपिकाव्याख्या
5. चन्द्रकलाव्याख्या

**प्रकाशकः –**

1. **मोतीलालबनारसीदासः**
2. **चौखम्बा सुरभारती**

3.1.4

## हल्-विसर्ग-स्वादिसन्धयः, हलन्तशब्दरूपप्रक्रिया अव्ययानि च

**सत्रार्द्धः** = 2 **श्रेयोऽङ्कः** = 4

**पाठ्यपरिचयः –**

पाठ्येऽस्मिन् श्चुत्वादिहल्सन्धयः, विसर्गसन्धयः, रुत्वादिस्वादिसन्धयः प्रतिपादिताः सन्ति। तथा च हलन्तपुँल्लिङ्गशब्दानां हलन्तस्त्रीलिङ्गशब्दानां हलन्तनपुंसकलिङ्गशब्दानां सिद्धिप्रक्रिया अत्र दत्ताऽस्ति। अव्ययस्य स्वरूपमप्यत्र विद्यते। अव्ययशब्दा अप्यत्र प्रतिपादिताः सन्ति।

**अधिगमपरिणामाः –**

छात्राध्यापका अमुं पाठ्यविषयमधीत्य -

- श्चुत्वादिहल्सन्धिकरणे, विसर्गसन्धिकरणे, रुत्वादिस्वादिसन्धिकरणे च समर्था भविष्यन्ति।
- हलन्तपुँल्लिङ्गशब्दरूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।
- हलन्तस्त्रीलिङ्गशब्दरूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।
- हलन्तनपुंसकलिङ्गशब्दरूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।
- अव्ययशब्दरूपाणि विज्ञाय संस्कृतभाषया व्यवहर्त्तुं समर्था भविष्यन्ति।

**पाठ्यांशः** –

1. हल्सन्धिः, विसर्गसन्धिः स्वादिसन्धिश्च।
   - आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते -
     अष्टाध्यायीधारणा - 'कर्मण्यण्' इत्यतः 'आत्ममाने खश्च' इत्यन्तो भागः ।
2. 'हो ढः' इत्यतः 'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' इत्यन्तो भागः ।
   - आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते -
     अष्टाध्यायीधारणा - 'भूते' इत्यतः 'मतिबुद्धिपूजार्थेभ्यश्च' इत्यन्तो भागः ।
3. 'मघवा बहुलम्' इत्यतः 'न मु ने ' इति सूत्रान्तो भागः ।



YsRawat

- आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते -
  अष्टाध्यायीधारणा - 'उणादयो बहुलम्' इत्यतः 'कर्मण्यधिकरणे च' इति सूत्रान्तो भागः ।

4. 'नहो धः' इत्यतः 'यथा वाचा निशा दिशा' इत्यन्तो भागः ।

- आन्तरिकमूल्याङ्कनवाक्परीक्षार्थम् — अङ्कद्वयस्य कृते -
  अष्टाध्यायीधारणा - 'स्त्रियां क्तिन्' इत्यतः 'स्मोत्तरे लङ् च' इत्यन्तो भागः ।

**प्रायोगिकम्**

- ➢ श्लोकेभ्यः, अव्ययपदानि चिनुत।
- ➢ हलन्तप्रातिपदिकं दृष्ट्वा रूपाणामुच्चारणम्।
- ➢ अध्यापकैः यानि उदाहरणानि पाठितानि, तेषाम्, तत्सम्बद्ध-अन्येषां वा उदाहरणानां विवरणं कुर्युः।
- ➢ सूत्रस्थपदानां परिचयं दद्युः।
- ➢ मञ्जूषातः सन्धिपदानि चिनुत।
- ➢ सूत्रान्त्याक्षरी भवेत्।
- ➢ व्याकरणप्रश्नमञ्चो भवेत्।
- ➢ पाठ्यांशस्य पारायणं भवेत्।
- ➢ अधीतशब्दैः वाक्यप्रयोगं कुरुत।
- ➢ छात्रैः अधीतग्रन्थस्य गणशः सामूहिकी चर्चा क्रियेत।
- ➢ गणशः छात्रान् प्रकल्प्य शास्त्रार्थं कारयत।

**विशेषः** - प्रतिमासमेकैकं प्रायोगिकं करणीयम्।
आहत्य उपर्युक्तेषु चत्वारि प्रायोगिकानि करणीयानि।

**प्रवचनप्रक्रिया**

- व्याख्यानविधिः
- फलकविधिः
- दृष्टान्तविधिः
- प्रतिदृष्टान्तविधिः
- प्रश्नोत्तरविधिः
- ई-कन्टेन्ट (P.P.T.) विडियोमाध्यमेन



YsRamesh

**आकलनप्रक्रिया**

आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

**स्वाध्यायसामग्री** (Suggestive Reading Materials) :-

**वैयाकरणसिद्धान्तकौमुदी (महामहोपाध्यायगिरिधरशर्मणामहामहोपाध्याय-परमेश्वरानन्दशर्मणा च संशोध्य सम्पादिता) अथ च गोपालदत्तपाण्डेयसम्पादिता।**

1. तत्त्वबोधिनीव्याख्या
2. बालमनोरमाव्याख्या
3. लक्ष्मीव्याख्या
4. दीपिकाव्याख्या
5. चन्द्रकलाव्याख्या
6. दीक्षितपुष्पाकृत-नव्यसिद्धान्तकौमुदी।

**प्रकाशक:** –

1. मोतीलालबनारसीदास
2. चौखम्बा सुरभारती

## दर्शनम्

**सत्रार्द्धः** – 2 **श्रेयोऽङ्कः**- 4

### 3.1.3 **शास्त्रीयविषयः (योगदर्शनम्)**

**पाठ्यपरिचयः** – भारतीययोगदर्शने प्रवेशार्थम् इदं पाठ्यं परिकलितं विद्यते । एतस्मिन् पाठ्यविषये योगशास्त्रे प्रवेशं प्राप्तुं समुत्सुकानां कृते सरलया रीत्या योगदर्शनस्य सिद्धान्ताः निरूपिताः सन्ति । भारतीयदार्शनिकचिन्तने योगदर्शनस्य यागदर्शनस्य च व्यापकः प्रभावो विद्यते । एतस्मिन् पाठ्यविषये महर्षिपतञ्जलिविरचितेषु योगसूत्रेषु महाराजभोजस्य राजमार्तण्डवृत्तिः निर्धारिता अस्ति । योगसूत्राणां तात्पर्यनिर्णये व्यासभाष्येण समं भोजवृत्तेरपि अनन्यसाधारणं योगदानम् अस्ति । एषः पाठ्यविषयः साध्ययोगस्य साधनयोगस्य च स्वरूपप्रतिपत्तौ उपकारको विद्यते ।

**अधिगमपरिणामः** – एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः -

- योगदर्शनस्य स्वरूपं प्रयोजनं च प्रतिपादयितुं समर्थाः भविष्यन्ति ।
- योग-शास्त्रस्य ज्ञानपरम्परां बोधयितुं शक्ष्यन्ति ।
- योगदर्शनस्य प्रवृत्तिं प्रबोधयितुं प्रभविष्यन्ति ।
- योगस्य समाधेः लक्षणं प्रक्रियां च बोधयितुं योग्याः भविष्यन्ति ।
- योगशास्त्रस्य सिद्धान्तान् प्रस्थानभेदांश्च पाठयितुं प्रभविष्यन्ति ।

**पाठ्यांशः** – **योगदर्शनम्**

| **पाठ्यांशः** | **विवरणम्** |
|---|---|
| १०. **योगप्रवेशः** | • योगदर्शनस्य प्रमुखाः आचार्याः ग्रन्थाश्च<br>• राजमार्तण्डवृत्तेः वैशिष्ट्यम्<br>• अथ योगानुशासनम्<br>• योगस्य स्वरूपम्<br>• चित्तभूमयः<br>• चित्तवृत्तयः तासां स्वरूपं च । |
| ११. **समाधियोगः** | • चित्तवृत्तिनिरोधोपायाः (अभ्यासः वैराग्यम्)<br>• सम्प्रज्ञातसमाधिः |



YsRameew

- सम्प्रज्ञातसमाधिविशेषाः
- ईश्वरस्वरूपम्
- योगान्तरायाः
- परिकर्माणि
- समापत्तयः
- ऋतम्भरा प्रज्ञा
- निर्बीजसमाधिः

१२. **साधनयोगः**

- क्रियायोगः
- पञ्च क्लेशाः
- कर्माशयः
- हेयम्
- हेयहेतुः
- गुणपर्वाणि
- संयोगः संयोगहेतुश्च
- हानोपायः

१३. **अष्टाङ्गयोगः**

- अष्टाङ्गयोगः
- यमाः (अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहाः)
- नियमाः (शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधानानि)
- यम-नियम-प्रतिष्ठाजन्यानि फलानि
- आसनम्
- प्राणायामः
- प्रत्याहारः
- धारणा
- ध्यानम्
- समाधिः



YSRameu

**प्रायोगिकम्** – अस्मिन् पाठ्ये छात्राध्यापकैः करणीयाः प्रयोगाः -

- योगदर्शनस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः, लेखनं भाषणं च ।
- पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम् ।
- क्रियायोग-अष्टाङ्गयोगाधारित प्रायोगिककार्याणि। आसनं प्राणायामः ध्यानमित्यादयः।
- यमनियमादीनाम् प्रयोगाः ।
- पुस्तकालय-परियोजना – कमप्येकं योगसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च ।
- योगदर्शनस्य दर्शनान्तरैः सह तुलनात्मकम् अध्ययनदृशा परियोजना/प्रश्नमञ्च/भाषणदृश्यांकन-कार्याणि ।
- योगशास्त्रस्य प्रकरणविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना ।

**आकलनप्रक्रिया** –

- आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

**प्रवचनप्रक्रिया** –

- व्याख्यान-प्रश्नोत्तरद्वारा संवादः सम्प्रेषणं च - पाठ्यप्रकरणविशेषमवलम्ब्य आदौ सिद्धान्तस्वरूपबोधकं विविधनिदर्शनसमन्वितं व्याख्यानं तदनु च व्याख्याते अंशे प्रश्नानां द्वारा सम्प्रेषितस्य पाठ्यांशस्य दृढीकरणम् । उत्थाप्यसमाधानपद्धतिः अपि आश्रयणीया । छात्राध्यापकाः विषयसम्बद्धान् अधिकाधिकप्रश्नान् यथा पृच्छेयुः तथा प्रेरणीयाः । (व्याख्यानद्वारा/PPT द्वारा) ।
- वृत्तिकारस्य लक्षणपरिष्कारशैलीं यथा ते अवगच्छेयुः अपि च स्वयमपि परिष्कार-सङ्गतिं च प्रतिपादयितुं यथा समर्थाः भवेयुः तथा अन्यानि अपि लौकिकनिदर्शनानि स्वीकृत्य अभ्यासः कारणीयः । (व्याख्यानद्वारा/PPT द्वारा)।

**स्वाध्यायसामग्री** –

- योगदर्शनम् - महर्षिः पतञ्जलिः, चौखम्बा प्रकाशन, वाराणसी
- योगसूत्रभोजवृत्ति - महाराजभोजः, जगदीशसंस्कृतपुस्तकालयः, जयपुर
- योगस्य भाषा संस्कृतम् - संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली



YsRamna

## दर्शनम्

**सत्रार्द्धः**– 2 **श्रेयोऽङ्कः**- 4

3.1.4 **शास्त्रीयविषयाः**

**पाठ्यपरिचयः** – भारतीयन्यायशास्त्रस्य पदार्थविचारान् परिज्ञातुम् इदं पाठ्यं परिकलितं विद्यते । एतस्मिन् पाठ्यविषये न्यायनये प्रवेशं प्राप्तुं समुत्सुकानां कृते सरलया रीत्या न्यायदर्शनस्य प्रमेयानि पदार्थाश्च वर्णिताः सन्ति । संस्कृतजगति पद-वाक्य-प्रमाणशास्त्राणि प्रसिद्धानि सन्ति । तत्र पदशास्त्रं नाम व्याकरणम्, वाक्यशास्त्रं नाम मीमांसा, प्रमाणशास्त्रं नाम न्यायशास्त्रम् । तदेतस्य प्रमाणशास्त्रस्य सरलतया बोधनाय श्रीमता केशवमिश्रेण तर्कभाषा विरचिता । एतस्मिन् पाठ्यविषये निर्धारिताः न्यायशास्त्रस्य प्रमेयविचाराः अध्येतुः पदार्थबोधाय उपकारकाः भवन्ति ।

**अधिगमपरिणामः** – एतस्य पाठ्यस्य अध्ययनेन छात्राध्यापकाः

- न्यायदर्शनस्य तत्त्वमीमांसां विज्ञापयितुं समर्थाः भविष्यन्ति।
- न्याय-शास्त्रस्य तर्कप्रणालीं बोधयितुं शक्ष्यन्ति ।
- न्यायदर्शनस्य वादप्रक्रियां प्रबोधयितुं प्रभविष्यन्ति
- न्यायशास्त्रस्य सिद्धान्तान् प्रस्थानभेदांश्च पाठयितुं प्रभविष्यन्ति ।

**पाठ्यांशः** –

| **पाठ्यांशः** | **विवरणम्** |
|---|---|
| १४. **प्रमेयबोधः** | • न्यायदर्शनस्य तत्त्वमीमांसा<br>• प्रमेयाणि<br>• आत्मनिरूपणम् (आत्मनः लक्षणम्, आत्मनः अस्तित्वे प्रमाणम्)<br>• न्यायमतेन ईश्वरनिरूपणम्<br>• शरीरम्<br>• इन्द्रियाणि |
| १५. **पदार्थबोधः** | • अर्थाः (षड् पदार्थाः)<br>• द्रव्याणि<br>• कार्यद्रव्याणाम् उत्पत्तिविनाशक्रमः |

- परमाणुलक्षणम्
- गुणाः
- कर्माणि
- सामान्यम्

१६. **पदार्थपरिचयः**

- विशेषः
- समवायः
- अभावः तद्भेदाश्च
- बुद्धिः
- मनः
- प्रवृत्तिः
- दोषाः
- प्रेत्यभावः
- फलम्
- दुःखम्
- अपवर्गः

१७. **तत्वबोधः**

- संशयः तद्भेदाश्च
- प्रयोजनम्
- दृष्टान्तः
- सिद्धान्तः
- अवयवाः
- तर्कः
- निर्णयः
- वादः
- जल्पः
- वितण्डा
- हेत्वाभासाः
- च्छलम्
- जातिः
- निग्रहस्थानम्



YS Ramam

**प्रायोगिकम्** – अस्मिन् पाठ्ये छात्राध्यापकैः करणीयाः प्रयोगाः -

- न्यायदर्शनस्य प्रमुखसिद्धान्तानां प्रबोधनाभ्यासः, लेखनं भाषणं च ।
- पूर्वपक्षम् अवलोक्य सिद्धान्तपक्षस्य सिद्धान्तपक्षमवलोक्य वा पूर्वपक्षस्य प्रवचनम् ।
- उदाहरणवाक्यम् अवलोक्य हेत्वाभासान्वेषणम् ।
- पुस्तकालय-परियोजना – कमप्येकं न्यायसिद्धान्तम् अधिकृत्य कयोरपि द्वयोः आचार्ययोः मतसंकलनं समीक्षणं च ।
- न्यायदर्शनस्य दर्शनान्तरैः सह तुलनात्मकम् अध्ययनदृशा परियोजना/प्रश्नमञ्च/भाषणदृश्यांकन-कार्याणि ।
- न्यायशास्त्रस्य प्रकरणविशेषे प्रयुक्तानां पारिभाषिकपदानां संकलनपरियोजना ।

**प्रवचनप्रक्रिया** –

- न्यायदर्शनस्य प्रवचने उद्देश्यलक्षणपरीक्षाक्रमेण छात्राध्यापकाः बोधनीयाः । न्यायदर्शनस्य लक्षणपरिष्कारशैलीं यथा ते अवगच्छेयुः अपि च स्वयमपि परिष्कार-सङ्गतिं च प्रतिपादयितुं यथा समर्थाः भवेयुः तथा अन्यानि अपि लौकिकनिदर्शनानि स्वीकृत्य अभ्यासः कारणीयः ।
- व्याख्यान-प्रश्नोत्तरद्वारा संवादः सम्प्रेषणं च - पाठ्यप्रकरणविशेषमवलम्ब्य आदौ सिद्धान्तस्वरूपबोधकं विविधनिदर्शनसमन्वितं व्याख्यानं तदनु च व्याख्याते अंशे प्रश्नानां द्वारा सम्प्रेषितस्य पाठ्यांशस्य दृढीकरणम् । उत्थाप्यसमाधानपद्धतिः अपि आश्रयणीया । छात्राध्यापकाः विषयसम्बद्धान् अधिकाधिकप्रश्नान् यथा पृच्छेयुः तथा प्रेरणीयाः ।

**आकलनप्रक्रिया** –

- आकलनप्रक्रिया परीक्षणाधारिता प्रायोगिककार्याधारिता च भविष्यति।

**स्वाध्यायसामग्री** –

- तर्कभाषा - केशवमिश्र, चौखम्बा प्रकाशन, वाराणसी ।
- तर्कसङ्ग्रहः - अन्नम्भट्टः, चौखम्बा प्रकाशन, वाराणसी ।

## फलितज्योतिषम्

**सत्रार्द्धः-2** **श्रेयोङ्कः-4**

**पाठ्यपरिचयः-**

अस्मिन्पाठ्यांशे ज्योतिषशास्त्रस्य प्रामाणिकग्रन्थस्य भारतीयकुण्डलीविज्ञानस्य मुख्यानां बिन्दूनाम् अध्यापनं भविष्यति। एतेषां बिन्दूनामध्ययनेन लग्नसाधनस्य ज्ञानं भविष्यति। लग्नसाधनं जन्मकुण्डल्याः आत्मास्वरूपं भवति। एतदनन्तरं नतोन्नतज्ञानम्, दशमलग्नम्, ससन्धि द्वादशभावानां साधनम्, कारकविचारः, ग्रहमैत्रीविचारादीनाम् अध्ययनं भविष्यति।

**अधिगमपरिणामः-**

1. अस्य पाठ्यविषयस्य अध्ययनान्तरं छात्राध्यापकाः अयनांश-चरखण्डमान-लंकोदयमानज्ञानेन लग्ननिर्धारणं कर्तुं शक्नुवन्ति।
2. आकाशे नतोन्नतज्ञानेन ग्रहाणां स्थितिं आकलयितुं समर्थाः भविष्यन्ति।
3. जन्मकुण्डल्यां भावकारकेन भावानां सम्यकसूक्ष्म फलादेशः कर्तुं शक्ष्यन्ति।

**पाठ्यांशः 1**

अयनांशसाधनम्, चरखण्डसाधनम्, लङ्कोदयमानानिस्वदेशीयोदयमानानि, लग्नपरिचयः, लग्नसाधनस्यप्रकारश्च।

**पाठ्यांशः 2**

नतोन्नतपरिचयः, नतोन्नतसाधनम्, दशमलग्नसाधनम्, ससन्धिद्वादशभावसाधनंच।

**पाठ्यांशः 3**

ग्रहदृष्टिः, षड्वर्गाः, षड्बलानि च। गोचरप्रकरणम्।

**पाठ्यांशः 4**

कारकपरिचयः,चरकारकाः,स्थिरकारकाःच, तन्वादिभावानांकारकाः, ग्रहमैत्रीविचारःच।

**प्रायोगिकम्-**

1. छात्राध्यापकाः स्वकल्पितोदाहरेण अयनांशसाधनेन सह चरखण्डसाधनंकृत्वा समर्पयेयुः।
2. छात्राध्यापकाः स्वकल्पितोदाहरेण लङ्कोदयमानम्, स्वदेशीयोदयमानेन सह लग्नसाधनं कृत्वा समर्पयेयुः।
3. छात्राध्यापकाः स्वकल्पितोदाहरेण दशमलग्नसाधनं कृत्वा ससन्धिद्वादशभावानां साधनं कृत्वा समर्पयेयुः।
4. छात्राध्यापकाः स्वकल्पितोदाहरेण चरकारक-स्थिरकारकानां फलके चित्रणं कृत्वा प्रदर्शनीयः।



YS Ramesh

**प्रवचनप्रक्रिया-**

1. पाठ्यांशानां सरलमानकसंस्कृतमाध्यमेनग्रन्थदिशा कक्षाध्यापनम्।
2. सायनमेषतुला राशो सूर्ये मध्याह्ने सति द्वादशाङ्गुलशङ्कुना पलभाज्ञानं कारयित्वा स्वदेशीयोदयमानानयनं प्रदर्शनीयम्।
3. लग्नसाधनं कृत्वा रात्रौ आकाशे तल्लग्नस्य पूर्वक्षितिजे प्रदर्शनम्।

**आकलनप्रक्रिया-** लिखितपरीक्षणम् तथा प्रदत्तकार्यस्य परीक्षणं भविष्यति।

**स्वाध्यायसामग्री-**

1. भारतीयकुण्डलीविज्ञानम्
2. बृहज्जातकम्
3. बृहत्पाराशरहोराशास्त्रम्
4. जैमिनीयसूत्रम्
5. फलदीपिका
6. लघुजातकम्
7. सारावली

## वास्तुशास्त्रम्

**सत्रार्द्धः – 2** **श्रेयोङ्कः-4**

**पाठ्यपरिचयः-**

ज्योतिषशास्त्रस्यैव अङ्गमस्ति वास्तुशास्त्रम्। अस्मिन् पाठ्यांशे वास्तुशास्त्रस्य आधारभूतज्ञानं प्राप्स्यन्ति छात्राध्यापकाः। अस्य शास्त्रस्य मुख्याधारः वर्तते पञ्चमहाभूताः। अग्निपृथ्वीवायुजलाकाशश्च। एतेषां यथा अस्माकं शरीरे संतुलनमावश्यकं तथैव अस्माकं निवासस्थाने गृहे वाऽपि परमावश्यकं तर्तते। तेन वास्तुशास्त्रानुकुले गृहे निवासेन जनाः पुरुषार्थचतुष्टयस्य प्राप्तिं कुर्वन्ति।

पाठ्यांशेऽस्मिन् छात्राध्यापकाः वास्तुशास्त्रस्य परिचयः, काकिणीविचारः, भूमिचयनं शोधनं च, गजपृष्ठादिभूलक्षणानि तत्फलानि च, शल्योद्धारः, दिग्ज्ञानम्, आयसाधनम्, वृषवास्तुचक्रम्, पिण्डानयनम्, राहुमुखविचारः, गृहारम्भमुहूर्तः, शिलान्यासः, गृहप्रवेशविचारादि अनेकाः विषयाः ज्ञास्यन्ति।

**अधिगमपरिणामः**-अस्य पाठ्यांशस्याधिगमनान्तरं छात्राध्यापकाः-

1. वास्तुशास्त्रस्य मौलिकज्ञानं भविष्यति।
2. भूमिचयने निपुणाः भविष्यन्ति।
3. भूमौ यदि शल्यः वर्तते तर्हि तस्य निष्कासनं कृत्वा भूशोधनं कर्तुं प्रभवन्ति।
4. निर्मितगृहे शुभदिगानुसारेण प्रकोष्ठानां नियोजनं कृत्वा शुभगृहस्य निर्माणं कर्तुं सक्ष्यन्ति।
5. गृहारम्भ-गृहप्रवेशमुहूर्तनिर्धारणे सिद्धाः भविष्यन्ति।

### पाठ्यांशः 1

वास्तुशास्त्रस्यपरिचयः, काकिणीविचारः, भूमिचयनंशोधनंच, गजपृष्ठादिभूलक्षणानितत्फलानिच

### पाठ्यांशः 2

शल्योद्धारः, दिग्ज्ञानम्, आयसाधनम्, वृषवास्तुचक्रंच।

### पाठ्यांशः 3

पिण्डानयनम्, राहुमुखविचारः, गृहारम्भमुहूर्तः, शिलान्यासःच।

### पाठ्यांशः 4

दिक्परत्वेनगृहविभागः, निषिद्धग्राह्यकाष्ठानि, गृहप्रवेशविचारःच।



YsRamu

**प्रायोगिकम्-**अमुं पाठ्यांशमधीत्य प्रत्येकं छात्राध्यापकाः-

1. भिन्न-भिन्न पुरुषाणां ग्रामाणां च नामानि स्वीकृत्य काकिणविचारस्य अभ्यासं करिष्यन्ति।
2. समाजे गृहं-गृहं प्रति गत्वा तेषां गृहं वास्तुशास्त्रनुकूलेन अस्ति न वा इति परीक्ष्य किं च तत्र त्रुटिः, तेन किं फलं मिलति इति गृहस्वामिना सह चर्चां कृत्वा स्व ज्ञानवर्धनं करिष्यन्ति।
3. भिन्न-भिन्न दिनांक गृहस्वामिनाम च स्वीकृत्य गृहारम्भ- गृहप्रवेशमुहूर्तस्य निर्धारणं कृत्वा समर्पयेयुः।
4. गृहे ग्राह्यनिषिद्धकष्ठस्य वृक्षाणां चित्रं पृथक्-पृथक् फलके उत्कीर्य समर्येयुः।

**प्रवचनप्रक्रिया-**

1. पाठ्यांशानां सरलमानकसंस्कृतमाध्यमेन ग्रन्थदिशा कक्षाध्यापनम्।
2. भूमिशोधनार्थं कक्षायाः बहिः रिक्ते क्षेत्रे छात्राध्यापकान् प्रायोगिकरूपेण पाठनम्।
3. छात्राध्यापकेभ्यः दिग्ज्ञानाय पुनःरिक्ते क्षेत्रे पारम्परिक रूपेण समाभूमौ प्रयोगं कृत्वा अध्यापनम्।
4. शल्यज्ञानशोधनाय च छात्राध्यापकान् रिक्ते क्षेत्रे वहन् पाठनम्।

**आकलनप्रक्रिया-** लिखितपरीक्षणम् तथा प्रदत्तकार्यस्य परीक्षणं भविष्यति।

**स्वाध्यायसामग्री-**

1. बृहद्वास्तुमाला
2. वास्तुरत्नावली
3. मुहूर्तचिन्तामणिः (वास्तुप्रकरणम्, गृहप्रवेशप्रकरणं च)
4. वास्तुसौख्यम्

## हिन्दी साहित्य एवं काव्य

**सत्रार्ध** : 2 **श्रेय अंक**: 4

### पाठ्य-परिचय

प्रस्तुत पाठ्यक्रम हिन्दी साहित्य के **मूल पाठ** से संबद्ध है। इसकी चार इकाइयों में भक्तिकाल, रीतिकाल एवं आधुनिककाल के कुछ प्रमुख काव्यांशों को पढ़ाया जाएगा। दो इकाइयों में भक्तिकाल एवं रीतिकाल के पाठों को तथा दो इकाइयों में छायावादी, प्रगतिवादी, प्रयोगवादी तथा समकालीन कविता की कुछ कविताओं को रखा गया है। इस पाठ्यक्रम का मुख्य उद्देश्य विद्यार्थियों को मूल पाठ से परिचित कराना है, जिससे वे अलग- अलग कालों में लिखे गए अलग-अलग काव्य रूपों से परिचित हो पाएँगे। इस पाठ्यक्रम में शामिल काव्यांशों को पढ़कर कविता की अवधारणा तथा उसमें अंतर्निहित वैचारिक एवं सामाजिक चिंतन को भी समझ पाएँगे। इन काव्यांशों को पढ़ते समय विद्यार्थियों को अनेक भारतीय भाषाओं के शब्दों के उच्चारण एवं उसके अर्थ का बोध हो पाएगा। इस पाठ्यक्रम का प्रमुख उद्देश्य पाठ के माध्यम से विद्यार्थियों को साहित्य में विषय एवं शैली के बदलते स्वरूप से भी परिचित कराना है ताकि विद्यार्थी पठित/पाठ्य हिन्दी साहित्य के भाव को युगानुकूल स्पष्ट करने में समर्थ हो सकें।

### अधिगम परिणाम

इस पाठ्यक्रम के अध्ययन के पश्चात विद्यार्थी निम्नलिखित बिन्दुओं को स्पष्ट कर सकेंगे-

- मध्यकाल एवं आधुनिक काल के साहित्य के स्वरुप को स्पष्ट करेंगे।
- कविता/पाठ के माध्यम से बदलते जीवन दर्शन को समझने का प्रयत्न करेंगे।
- पाठ के माध्यम से भक्ति के निर्गुण एवं सगुण काव्य-परंपरा को समझ सकेंगे।
- पाठ के माध्यम से कबीरदास, जायसी, तुलसीदास, सूरदास एवं मीराँबाई की भक्ति भावना से परिचित होंगे।
- रहीम, बिहारी और रसखान को पढ़कर भक्ति, नीति और श्रृंगार की भावना को समझ पाएँगे।
- आधुनिक युग में हिन्दी काव्य के बदलते स्वरूप को समझ सकेंगे।
- पाठ के माध्यम से राष्ट्र में व्याप्त तत्कालीन राष्ट्रीय आन्दोलन, सांस्कृतिक एवं साहित्यिक चेतना को समझ सकेंगे।
- पाठ के माध्यम से प्रगतिशील काव्य के बदलते तेवर और मुद्दों को समझ सकेंगे।
- हिन्दी साहित्य में प्रयोगवादी कविता और समकालीन कविता के भाव पक्ष से परिचित होंगे।
- साहित्य और प्रकृति के संबंधों को समझ सकेंगे।



YSRamana

## पाठ्यांश- I

1. कबीरदास-
    - गुरूदेव कौ अंग- (3,13)
    - सुमिरण कौ अंग- (4,32)
    - विरह कौ अंग- (22,45)
    - पद- 1. दुलहिन गावहु मंगलचार
2. मलिक मुहम्मद जायसी-
    - नागमति वियोग वर्णन (1 से 15)
3. सूरदास- पद्य सं- 2, 9, 16, 76, 82, 186
    - अविगत-गति कछु ........
    - मेरो मन अनत कहाँ .........
    - ऊधो मन नाहीं दस-बीस .......
    - जसुमति मन अभिलाष करै ........
    - सुत मुख देखि .........
    - निर्गुन कौन देश को बासी।
4. तुलसीदास
    - विनय पत्रिका पद सं. (79, 105)
    - रामचरितमानस- बालकांड- पुष्पवाटिका प्रसंग

## पाठ्यांश-II

1. मीराँबाई- पद सं. (4,37,68,70,85)

3. रहीम- दोहा सं. (16-31)

4. बिहारी- दोहे

    मेरी भव बाधा.........
    पाई महावर......
    मरनु भलो.......
    बड़े न हुजै.........
    स्वारथ सुकृत..........
    नर की अरु नल.........



YsRamu

कहलाने एको बसत

कहत नटत ...........

## पाठ्यांश- III

1. मैथिलीशरण गुप्त - भारत-भारती (अतीत खण्ड)
2. जयशंकर प्रसाद - कामयनी (श्रद्धा सर्ग)
3. सूर्यकांत त्रिपाठी निराला – जूही की कली, स्नेह निर्झर बह गया है
4. सुमित्रानन्दन पंत – प्रथम रश्मि
5. महादेवी वर्मा – जाग तुझको दूर जाना

## पाठ्यांश- IV

1. दिनकर - रश्मिरथि (प्रथम सर्ग)
2. अज्ञेय - यह दीप अकेला
3. नागार्जुन – उनको प्रणाम
4. केदारनाथ अग्रवाल- हवा हूँ हवा मैं बसंती हवा
5. भवानी प्रसाद मिश्र- सतपुड़ा के घने जंगल

**प्रायोगिक**

1. भक्ति काव्य में अलंकारो को उदाहरण सहित प्रस्तुत करना।
2. कठिन एवं देशज शब्दों शब्दकोश बनाना तथा उनका अंग्रेजी अर्थ लिखना।
3. हवा हूँ हवा मैं बसंती हवा एवं सतपुड़ा के घने जंगल कविता के माध्यम से कविता और प्रकृति/पर्यावरण के संबंध को समझना।
4. हिन्दी की नीति संबंधित कविता तथा संस्कृत सुभाषितानि अथवा नीति के श्लोकों की तुलना।

अथवा

कक्षा संगोष्ठी में हिन्दी कविता में कालानुसार होने वाले परिवर्तनों पर चर्चा करना।

**प्रवचन प्रक्रिया**

- मौखिक विधि
- व्याख्या विधि
- प्रत्यक्ष विधि एवं
- **सामग्री**-समीक्षा

**आकलन प्रक्रिया**

- मौखिक तथा लिखित परीक्षा एवं प्रायोगिक कार्य के आधार पर आकलन किया जाएगा



JSRawat

**स्वाध्याय सामग्री**


1. सम्पादक, श्यामसुन्दरदास : कबीर ग्रंथावली, लोकभारती प्रकाशन, नयी दिल्ली।
2. द्विवेदी, सं. हजारी प्रसाद : कबीर, राजकमल प्रकाशन, नयी दिल्ली।
3. शुक्ल, सं. आचार्य रामचंद्र : पद्मावत, नागरी प्रचारिणी सभा, वाराणसी।
4. वाजपेयी, आ. नन्ददुलारे : सूरदास, लोकभारती प्रकाशन, नयी दिल्ली।
5. तुलसीदास : विनय-पत्रिका, गीता प्रेस, गोरखपुर।
6. तुलसीदास : रामचरितमानस, गीता प्रेस, गोरखपुर।
7. चतुर्वेदी, सं. परशुराम : मीराबाई की पदावली, हिन्दी साहित्य सम्मेलन, प्रयागराज।
8. गुप्त, डॉ. जगदीश : रीति काव्य, वसुमती प्रकाशन, इलाहबाद।
9. रमण, रेवती : मैथिलीशरण गुप्त, साहित्य अकादमी, नयी दिल्ली।
10. शर्मा, रामविलास : निराला की साहित्य साधना, राजकमल प्रकाशन, दिल्ली।
11. पालीवाल, कृष्णादत्त : सुमित्रानन्दन पंत, साहित्य अकादमी, नयी दिल्ली।
12. प्रसाद, जयशंकर : कामायनी, राजकमल प्रकाशन, दिल्ली।
13. शर्मा, रामविलास : राग-विराग, राजकमल प्रकाशन, दिल्ली।
14. तिवारी, विश्वनाथ प्रसाद : महादेवी रचना संचयन, साहित्य अकादमी, नयी दिल्ली।
15. दिनकर, रामधारी सिंह : रश्मिरथि, लोकभारती प्रकाशन, नयी दिल्ली।
16. अज्ञेय : बावरा अहेरी, भारतीय ज्ञानपीठ, नयी दिल्ली।
17. पाण्डेय, मैनेजर : नागार्जुन रचना संचयन, साहित्य अकादमी, नयी दिल्ली।
18. अग्रवाल, केदारनाथ : फूल नहीं, रंग बोलते हैं, साहित्य भंडार, इलाहाबाद।
19. मिश्र, भवानी प्रसाद : गीत फरोश, नवहिन्द प्रकाशन, हैदराबाद।

विशेषः - (साहित्य अकादमी, दिल्ली द्वारा प्रकाशित मोनोग्राफ)

## English Literature

**Semester: II** **Credits-4 (2.2 & 1.8)**

**About the course:**

- This paper will introduce students to the English literature, a period of lasting importance since it serves as a critical link between the Enlightenment and Modernist literature.
- It will offer a selection of canonical poems and prose that constitute the core texts in English Literature.
- It imbues learners with a good aesthetic faculty of thinking.
- Learners will have an advanced level of knowledge in English literature.

**Leaning Outcomes:**

- It will help students explore poetry, drama, essays, and prose texts in a range of political, philosophical, and cultural contexts.
- Students will understand Indian writing in English.
